# shrIkRiShNavilAsakAvyam by Sukumarakavi

# શ્રીકૃષ્ણવિલાસકાવ્યમ્ સુકુમારકવિવિરચિતમ્

## Document Information


Text title : kRiShNavilAsakAvyam

File name : shrIkRiShNavilAsakAvyam.itx

Category : vishhnu, krishna, vishnu

Location : doc_vishhnu

Author : sukumArakavi

Transliterated by : NS Panicker in Malayalam http://sreekrishnavilasam.blogspot.in/

Proofread by : PSA Easwaran

Latest update : August 2, 2012

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીકૃષ્ણવિલાસકાવ્યમ્ સુકુમારકવિવિરચિતમ્

॥ શ્રીઃ ॥

પ્રથમઃ સર્ગઃ

અસ્તિ શ્રિયઃ સદ્મ સુમેરુનામા સમસ્તકલ્યાણનિધિર્ગિરીન્દ્રઃ ।
તિષ્ઠન્નિદં વિશ્વમનુપ્રવિશ્ય સ્વેનાત્મના વિષ્ણુરિવોર્જિતેન ॥ ૧-૦૧॥

મિથસ્તિરોભાવવિલોકનાભ્યાં સઙ્ક્રીડમાનાવિવ બાલકૌ દ્વૌ ।
પાર્શ્વેષુ યસ્યાશુ પરિભ્રમન્તૌ ચન્દ્રાંશુમન્તૌ નયતો દિનાનિ ॥ ૧-૦૨॥

ઉચ્ચૈશ્શિખઃ કાઞ્ચનગૌરવર્ણસ્તમો નિગૃહ્ણન્મહસા નિજેન ।
દીપસ્ત્રયાણામિવ વિષ્ટપાનાં યો ભાતિ પર્યન્તચરત્પતઙ્ગઃ ॥ ૧-૦૩॥

યસ્યા પતિત્વે વિહિતાભિલાષઃ કરોતિ તીવ્રાણિ તપાંસિ લોકઃ ।
બિભર્તિ રત્નાકરમેખલાં તામઙ્કેન પુત્રીમિવ યો ધરિત્રીમ્ ॥ ૧-૦૪॥

મહાન્તિ દાનાનિ મખાનુદગ્રાન્ પરાઞ્ચિ પાનાશનયોસ્તપાંસિ ।
શરીરિણઃ શાન્તમલૈર્મનોભિઃ કુર્વન્તિ યચ્છૃઙ્ગનિવાસકામાઃ ॥ ૧-૦૫॥

સુરા યુગાન્તેષુ સહ પ્રિયાભિર્નિષેદિવાંસો યદધિત્યકાસુ ।
ઉદન્વતામૈક્યમુપાગતાનાં પશ્યન્તિ કલ્લોલશતપ્રચારાન્ ॥ ૧-૦૬॥

પુષ્પાણિ શય્યાસ્સુરપાદપાનાં ક્રીડાગૃહાઃ કાઞ્ચનગહ્વરાણિ ।
ભવન્તિ ચ સ્વર્ગવિલાસિનીનાં રત્નાઙ્કુરા યત્ર રતિપ્રદીપાઃ ॥ ૧-૦૭॥

સ્વર્ગૌકસસ્સ્વર્ણમહીષુ પીતાઃ શ્વેતત્વિષો રૂપ્યમયીષુ ભૂષુ ।
નીલાશ્ચ નીલોપલમેદિનીષુ જ્ઞાતું મિથો યત્ર ન શક્નુવન્તિ ॥ ૧-૦૮॥

દરીગૃહોત્સઙ્ગગતેરનૂરોઃ કશાભિઘાતધ્વનિભિઃ સકમ્પાઃ ।
સદ્યઃ પ્રિયાનુજ્ઝિતમાનદોષાઃ સુરાઙ્ગના યત્ર પરિષ્વજન્તે ॥ ૧-૦૯॥

નેતું ત્રપાનમ્રમુખીરનીશાઃ સ્ફુટાનિ યત્સ્વર્ણગુહાન્તરાણિ ।
સિદ્ધાઃ પ્રયત્નેન વિના નવોઢાઃ નયન્તિ નીલોપલગહ્વરાણિ ॥ ૧-૧૦॥

યત્રોદ્યતાનાં કુસુમાપચાયે કાન્તાસુ કલ્પદ્રુમવાટિકાસુ ।
વિભાન્તિ સુત્રામવિલાસિનીનાં પદાનિ લાક્ષારસપાટલાનિ ॥ ૧-૧૧॥

પયોદમાર્ગવ્યતિલઙ્ઘિનીષુ હંસાઃ શિરઃપુષ્કરિણીષુ યસ્ય ।
વર્ષાગમેઽપ્યશ્રુતમેઘનાદાઃ ન કુર્વતે માનસદીર્ઘયાત્રામ્ ॥ ૧-૧૨॥

છન્નેષુ યસ્મિન્ કનકોજ્જ્વલાભિરામૂલચૂડં નવમઞ્જરીભિઃ ।
ગન્ધેન વિજ્ઞાય પતન્તિ ભૃઙ્ગાઃ શ‍ૃઙ્ગાન્તરારગ્વધપાદપેષુ ॥ ૧-૧૩॥

મન્દાકિની યચ્છિખરે વહન્તી કુલ્યાપથાભ્યન્તરસમ્પ્રવિષ્ટા ।
બાલેવ તદ્રક્ષણસમ્પ્રવૃત્તા દિને દિને સિઞ્ચતિ પુષ્પવાટીમ્ ॥ ૧-૧૪॥

શ્રિયાભિરામશ્શરણં સુરાણામલઙ્ઘનીયો મહતા મહિમ્ના ।
વિરાજમાનો વનમાલયા ચ યઃ શાર્ઙ્ગધન્વાનમનુપ્રયાતિ ॥ ૧-૧૫॥

પુરા પુરાણાં ત્રિતયં દિધક્ષોરુમાપતેઃ કાર્મુકતાં પ્રપન્નઃ ।
મધ્યેન વજ્રાઙ્કુશમત્સ્યચિહ્નં યોઽદ્યાપિ તન્મુષ્ટિપદં દધાતિ ॥ ૧-૧૬॥

શ‍ૃઙ્ગાગ્રભાજાં સુરસુન્દરીણાં મુખાનિ પશ્યન્નમલાનિ ચન્દ્રઃ ।
નિગૂહિતું નૂનમુરઃકલઙ્કં હ્રિયેવ યત્સાનુપથેન યાતિ ॥ ૧-૧૭॥

મનોભિરામે શિખરે તદીયે સહોપવિષ્ટં સુરસિદ્ધસઙ્ઘૈઃ ।
અવોચદાગત્ય કૃતપ્રણામા કદાચિદુર્વી કમલાધિવાસમ્ ॥ ૧-૧૮॥

પુમાનિવાહં ભવતઃ પુરસ્તાદ્બ્રવીમિ કિઞ્ચિત્ પ્રતિપદ્ય ધૈર્યમ્ ।
પીડા મદીયા પરમત્ર હેતુર્નિર્લ્લજ્જતા નન્વખિલોપહાસ્યા ॥ ૧-૧૯॥

સૃષ્ટાસ્ત્વયા દત્તવરાશ્ચ દૈત્યાઃ ભારેણ માં સમ્પ્રતિ પીડયન્તિ ।
બલે પ્રમાણે ચ ભવન્તિ યેષાં નૈવોપમાનં કુલભૂભૃતોઽપિ ॥ ૧-૨૦॥

સ્વવિક્રમોન્મૂલિતરાજકાનાં જયૈષિણામદ્ય પરસ્પરેણ ।
તેષાં રણક્ષોણિષુ સિંહનાદૈર્નિર્ઘાતઘોરૈર્ગિરયઃ સ્ફુટન્તિ ॥ ૧-૨૧॥

મુહુર્બલાદુન્નમયત્યહીન્દ્રે મદ્ભારભુગ્નં ફણચક્રવાલમ્।
મમ પ્રકમ્પાશ્ચલિતાબ્ધિશૈલાઃ દિગ્દન્તિનો હન્ત કદર્થયન્તિ ॥ ૧-૨૨॥

આશામુખેષુ ભ્રમતામજસ્રં તેષાં ચમૂભિઃ પરિસર્પિણીભિઃ ।
તિરોહિતાં ભાનુમતો મયૂખાઃ ન ક્વાપિ માં સમ્પ્રતિ સંસ્પૃશન્તિ ॥ ૧-૨૩॥

સન્નાસ્મિ દૈતેયભરેણ સાહં ફણીશ્વરસ્સીદતિ મદ્ભરેણ ।

તદ્ભારશીર્યન્નિજકર્પરસ્ય ધિક્ તામવસ્થાં કમઠેશ્વરસ્ય ॥ ૧-૨૪॥

ભારાવસીદદ્ફણમણ્ડલસ્ય ફણીશ્વરસ્યોપરિ દુઃસ્થિતાઽહમ્ ।
આસન્નપાતાસ્મિ તટીવ નદ્યાઃ પ્રવાહવેગેન વિલુપ્તમૂલા ॥ ૧-૨૫॥

નિવેદિતા દેવ મયા દશેયમનુક્તિદોષો મયિ નોપપાદ્યઃ ।
નિવેદ્યતે રક્ષ્યજનેન દુઃખં તતઃ પરસ્તાત્ પ્રભવઃ પ્રમાણમ્ ॥ ૧-૨૬॥

ઇત્યુક્તવત્યામુચિતં પૃથિવ્યાં ચિન્તાબલેન સ્તિમિતો મુહૂર્તમ્ ।
મુખાનિ પશ્યન્નમૃતાશનાનાં દેવઃ પ્રજાનાં પતિરિત્યુવાચ ॥ ૧-૨૭॥

નાસત્યમેતદ્યદવોચદુર્વી સ્વકર્મણઃ સાધુ ફલં મયાઽઽપ્તમ્ ।
મદ્વર્દ્ધિતા મામવમત્ય દૈત્યાઃ બલાદુપઘ્નન્તિ જગન્તિ યત્તે ॥ ૧-૨૮॥

અતીતકાર્યાનુશયેન કિં સ્યાદશેષવિદ્વજ્જનગર્હિતેન ।
સુરાઃ સમુન્મૂલનમાશુ તેષાં કર્તું યતધ્વં જગતાં હિતાય ॥ ૧-૨૯॥

સદ્યસ્સમુત્તિષ્ઠત ચિન્તયાલં ચિન્તા હિ કાર્યપ્રતિબન્ધહેતુઃ ।
યામઃ પૃથિવ્યા સહ યત્ર તત્ર નારાયણો દાનવકાલરાત્રિઃ ॥ ૧-૩૦॥

અસ્ત્વેવમિત્યાદરપૂર્વમેવ સ સ્વીકૃતોક્તિસ્સુરસિદ્ધસઙ્ઘૈઃ ।
સરોજજન્મા સહ તૈઃ પ્રતસ્થે વિહાયસા વિશ્વપતેસ્સકાશમ્ ॥ ૧-૩૧॥

એલાપરિષ્વઙ્ગલસત્તમાલં વેલાધિરૂઢસ્ખલદૂર્મિમાલમ્ ।
દદર્શ ધાતા મનસોઽનુકૂલં પયઃપયોધેરચિરેણ કૂલમ્ ॥ ૧-૩૨॥

દદર્શ ચ ક્ષીરમયં સમુદ્રં કૈલાસશૃઙ્ગોન્નતફેનકૂટમ્ ।
પુણ્યં પયઃકેલિસમુત્સુકાનાં શ્રિયઃ સખીનામવગાહનેન ॥ ૧-૩૩॥

આનન્દયામાસ દિવૌકસસ્તાનાઘ્રાતશેષો મુનિમણ્ડલેન ।
પ્રકામપુણ્યઃ પવનોપનીતો વૈકુણ્ઠવક્ષસ્તુલસીસુગન્ધઃ ॥ ૧-૩૪॥

ગન્ધાનુસારેણ વિસૃષ્ટનેત્રૈર્હિરણ્યગર્ભપ્રમુખૈરમર્ત્યૈઃ ।
નવાર્કકલ્પં દદૃશે મુરારેર્વક્ષસ્થલીકૌસ્તુભરત્નધામ ॥ ૧-૩૫॥

અપહ્નુતાશેષમનોવિકારં દિવિસ્પૃશા તૂર્યરવેણ મિશ્રમ્ ।
આકર્ણ્ય વૈકુણ્ઠવિલાસિનીનાં ગીતધ્વનિં હર્ષમયાસિષુસ્તે ॥ ૧-૩૬॥

આસક્તિમાલક્ષ્ય વિનીતવેષા સ્વમૌલિવિન્યસ્તકરાસ્સુરાસ્તે ।
આલોકયામાસુરશેષનાથં સવિગ્રહં પુણ્યમિવ પ્રજાનામ્ ॥ ૧-૩૭॥

પ્રવૃદ્ધહેમાભરણપ્રકાશં તમાલનીલં જલધૌ શયાનમ્ ।
તટિલ્લતાઢ્યં પયસોઽતિપાનાદનીશમુદ્ગન્તુમિવામ્બુવાહમ્ ॥ ૧-૩૮॥

તરઙ્ગવાતેન પયઃપયોધેરાપૂર્યમાણં કરપાઞ્ચજન્યમ્ ।
વામેન તિર્યગ્વલતા સલીલં સમ્ભાવયન્તં મુહુરીક્ષણેન ॥ ૧-૩૯॥

પ્રતિક્ષણં પ્રેમવિશેષજાભિસ્સમ્ભાવનાભિઃ કમલાસનાયાઃ ।
પુરાઽઽત્મના કલ્પિતમમ્બુરાશેઃ પ્રમાર્જયન્તં મથનાવમાનમ્ ॥ ૧-૪૦॥

પર્યાયતઃ પાણિધૃતં સરોજં વિન્યસ્ય વિન્યસ્ય દૃશોઃ પદવ્યામ્।
નિદ્રાં પ્રબોધં ચ મુહુર્નયન્તીં પદ્માસનાં સસ્મિતમીક્ષમાણામ્ ॥ ૧-૪૧॥

સ્વચ્છસ્વદેહપ્રતિબિમ્બિતેન ફણાશ્મજાલેન ફણીશ્વરસ્ય ।
ભાસ્વત્ ફલસ્તોમનિરન્તરસ્ય વહન્તમાભાં વટપાદપસ્ય ॥ ૧-૪૨॥

અજસ્રમાસીનરથાઙ્ગશઙ્ખમતિપ્રસન્નં કમલાધિવાસમ્ ।
સન્તાપવિચ્છેદકરં પ્રજાનાં હ્રદં મહીયાંસમિવાભિગમ્યમ્ ॥ ૧-૪૩॥

વક્તું મિથો રાહુવિચેષ્ટિતાનિ કર્ણદ્વયાભ્યર્ણમુપેયિવાંસૌ ।
અલબ્ધકાલાવિવ ભાનુચન્દ્રૌ રથાઙ્ગશઙ્ખૌ દધતં કરાભ્યામ્ ॥ ૧-૪૪॥

દ્વારસ્થસેનાપતિચોદિતેન નિવારિતાઃ કઞ્ચુકિમણ્ડલેન ।
સુરાઃ પ્રમોદસ્ખલિતૈર્વચોભિઃ સ્થિત્વૈવ તે વ્યોમનિ તુષ્ટુવુસ્તમ્ ॥ ૧-૪૫॥

નમઃ પરસ્મૈ પુરુષાય તુભ્યં ગિરાં ધિયામપ્યપથિ સ્થિતાય ।
અસ્માન્ પુનસ્ત્રાતુમુદગ્રમોહાન્ કૃપાબલાત્ કલ્પિતવિગ્રહાય ॥ ૧-૪૬॥

ભાગીરથી પાદકુશેશયાત્તે વિનિર્ગતા વિશ્વમિદં પુનીતે ।
કસ્ત્વાં પુનર્ભાવયતો જનસ્ય શુદ્ધિં પરિચ્છેત્તુમલં મનીષી ॥ ૧-૪૭॥

અનન્તશક્તેરપવિક્રિયસ્ય તિસ્રસ્ત્રિલોકીશ્વર શક્તયસ્તે ।
વિતન્વતે સ્થાવરજઙ્ગમાનામુત્પાદનક્ષેમવિલોપનાનિ ॥ ૧-૪૮॥

કટાક્ષમાત્રેણ ભવામ્બુરાશેઃ પારં પરં પ્રાપયિતુસ્ત્રિલોકીમ્ ।
સકૃન્નમસ્યા પરમાતરસ્તે યત્નાનુરૂપં હિ ફલં ક્રિયાણામ્ ॥ ૧-૪૯॥

ત્વં જ્યોતિરાપસ્ત્વમસિ ત્વમુર્વી ત્વં વ્યોમ વૈશ્વાનરસારથિસ્ત્વમ્ ।
ત્વં જીવવર્ગઃ પરમસ્ત્વમાત્મા યન્નાસિ કિં નામ જગત્પતે તત્ ॥ ૧-૫૦॥

નવાભ્રવર્ણં નલિનાયતાક્ષં પીતામ્બરં હારકિરીટિનં ત્વામ્ ।
વયં તુ સેવેમહિ વીક્ષમાણાઃ સાયૂજ્યમન્વિછતિ કઃ સુખાર્થી ॥ ૧-૫૧॥

અલં ન નિર્દેષ્ટુમિયત્તયા ત્વામશેષનાથ શ્રુતિરગ્રિમાપિ ।
સ એવ સાક્ષાત્ક્રિયતે પુનસ્ત્વમહો જિતં નઃ સુકૃતૈરનલ્પૈઃ ॥ ૧-૫૨॥

તૃણાય મત્વા નિખિલાનિ શાર્ઙ્ગિન્ પદાનિ વૈધેયમનોહરાણિ ।
આવૃત્તિશૂન્યં પરમં પદં તે વાઞ્છન્તિ વૈરાગ્યધના મહાન્તઃ ॥ ૧-૫૩॥

ઇતિ સ્તુતો દેવગણેન દેવો દયાનિધિર્દાનવકાલરાત્રિઃ ।
ન્યષીદદુત્થાય ભરાવભુગ્ને ભુજઙ્ગતલ્પે ભુવનૈકનાથઃ ॥ ૧-૫૪॥

વિષ્વક્ સ વૈકુણ્ઠવિલાસિનીનાં સલીલમાન્દોલિતચામરાણામ્ ।
નિવારયન્નગ્રકરારવિન્દૈઃ કોલાહલં કાઞ્ચનકઙ્કણોત્થમ્ ॥ ૧-૫૫॥

પ્રસાદવત્યા કમલાસનાદીન્ સુરાનશેષાનનુગૃહ્ય દૃષ્ટ્યા ।
ઉવાચ વાચં દશનાંશુપૂરૈઃ સમેધયન્ દુગ્ધમયં પયોધિમ્ ॥ ૧-૫૬॥

અધિજ્યકોદણ્ડધરો નિષઙ્ગી સન્નાહવાન્ પાણિધૃતૈકબાણઃ ।
અયં સમાજો ભવતાં દ્વિષદ્ભ્યો ભયં સમાવેદયતિ સ્ફુટં મે ॥ ૧-૫૭॥

અલં વિલમ્બેન દિવૌકસસ્તન્નિવેદ્યતામદ્ય કુતો ભયં વઃ ।
અયં કરો દુષ્ટવધોત્સુકં મે સુદર્શનં ન ક્ષમતે નિરોદ્ધુમ્ ॥ ૧-૫૮॥

ઇત્યૂચિવાંસં પરમં પુમાંસં નત્વા શિરોભિર્બહુશઃ સુરાસ્તે ।
આરૂઢહર્ષાતિશયાઃ સ્વમર્થમારેભિરે વક્તુમશેષમેવ ॥ ૧-૫૯॥

નિવાર્ય સર્વાનપિ વક્તુકામાન્ સેનાપતિસ્તાનમરાન્ કરેણ ।
સવિભ્રમપ્રેરિતયા પુરસ્થં દૃષ્ટ્યા સરોજાસનમાજુહાવ ॥ ૧-૬૦॥

અથાગતસ્તેન કરે ગૃહીત્વા નીતઃ પ્રભોરન્તિકમબ્જયોનિઃ ।
વક્તું નિયુક્તઃ સ કૃતપ્રણામો વિજ્ઞાપયામાસ વિનીતવેષઃ ॥ ૧-૬૧॥

વયં ત્વયા દત્તવિભૂતયોઽપિ મોહાતિરેકાદભિમન્યમાનાઃ ।
કૃચ્છ્રે પુનસ્ત્વાં શરણં વ્રજન્તઃ હા નિસ્ત્રપાણાં પ્રથમે ભવામઃ ॥ ૧-૬૨॥

અપારદુઃખાર્ણવપોતપાત્રીં ત્વયા કૃપામુદ્વહતાતિગુર્વીમ્ ।
કૃતઘ્નતાજન્મભુવામમીષામસ્માકમર્થે ન કિમન્વભાવિ ॥ ૧-૬૩॥

મનસ્વિલોકસ્ય વિગર્હણીયે પ્રતિગ્રહે વર્જયતા જુગુપ્સામ્ ।
પુરા પુરસ્તાદ્બલિદાનવસ્ય પ્રસારિતો નાગ્રકરસ્ત્વયા કિમ્ ॥ ૧-૬૪॥

દૈત્યાધિરાજેન હિરણ્યનામ્ના પર્યાકુલં ત્રાતુમશેષલોકમ્ ।

ઇદં તુ દિવ્યં પરિહૃત્ય રૂપં ન ત્વં કિમાસીર્નરતિર્યગાત્મા ॥ ૧-૬૫॥

સ્વવિક્રમાક્રાન્તસુરાસુરસ્ય રક્ષઃપતેર્નિગ્રહણાદરેણ ।
ભૂત્વા સુતઃ પઙ્ક્તિરથસ્ય રાજ્ઞસ્તાં તામવસ્થાં ન કિમન્વભૂસ્ત્વમ્ ॥ ૧-૬૬॥

અનેકધા પાલયિતારમેવં સમ્પ્રત્યપિ ત્વાં શરણં પ્રપન્નાઃ ।
સન્તાપહારી નનુ ચાતકાનાં ભૂયોઽપિ ભૂયોઽપિ પયોદ એવ ॥ ૧-૬૭॥

વિશ્વં વિદન્નપ્યવિદન્નિવ ત્વં નાથાનુયુઙ્ક્ષે ભયહેતુમસ્માન્ ।
અનુગ્રહસ્યૈતદપિ પ્રભૂણાં પ્રાયઃ પ્રકારાન્તરમાશ્રિતેષુ ॥ ૧-૬૮॥

તપોભિરુગ્રૈર્ભગવન્ સુરાણામવધ્યભાવં દનુજાઃ પ્રપન્નાઃ ।
પાતાલમુર્વીં ચ વિજિત્ય દર્પાદુપક્રમં તે દિવમદ્ય જેતુમ્ ॥ ૧-૬૯॥

ન જાતુ શૂન્યઃ કુલિશેન પાણિર્વક્ષો ન મુક્તં મણિકઙ્કટેન ।
શક્રસ્ય દૈત્યાગતિશઙ્કિનોઽસ્ય નાસજ્જિતસ્તિષ્ઠતિ વારણેન્દ્રઃ ॥ ૧-૭૦॥

દણ્ડં યમાત્પાશમપામધીશાદ્ગદાં કુબેરાત્કુલિશં મઘોનઃ ।
આદાતુકામઃ પ્રહિણોતિ દૂતાન્ કંસઃ સ્વદોર્વિક્રમનિર્જિતાશઃ ॥ ૧-૭૧॥

રણે વિનિર્જિત્ય બલં સુરાણાં પરાક્રમેણાપ્રતિમેન વીરઃ ।
ભોજેશ્વરઃ ક્રીડતિ સાવરોધો મૂલેષુ સમ્પ્રત્યમરદ્રુમાણામ્ ॥ ૧-૭૨॥

ધનુર્ધરાધ્યાસિતવપ્રશીર્ષાઃ દ્વાઃપાલનવ્યગ્રસમગ્રયોધાઃ ।
પ્રવીરનિર્ભર્ત્સિતકાન્દિશીકા સ્થાતું ન જાનાતિ પુરી સુરાણામ્ ॥ ૧-૭૩॥

હાહેતિ વિક્રોશદનાથમેતદ્વિશ્વં જગત્પીડયતઃ પ્રકામમ્ ।
ત્વયા વિનાઽન્યસ્ત્રિષુ વિષ્ટપેષુ ન કર્તુમીષ્ટે નરકસ્ય ભઙ્ગમ્ ॥ ૧-૭૪॥

પ્રલમ્બકેશિપ્રમુખાસ્તથાન્યે પરસ્સહસ્રં પરિયન્તિ દૈત્યાઃ ।
નિર્ઘાતકલ્પૈર્નિજસિંહનાદૈર્વિદારયન્તો વિયદાહવેષુ ॥ ૧-૭૫॥

ષટ્ સૂનવસ્સન્તિ હિરણ્યનામ્નો દૈત્યસ્ય પાતાલતલાધિવાસૈઃ ।
તૈર્નઃ ક્રિયન્તે દુરિતાનિ યાનિ વક્તું ન શક્યાનિ મુકુન્દ તાનિ ॥ ૧-૭૬॥

તેષાં મહીધ્રપ્રતિમાકૃતીનાં ભારં મહી સોઢુમસાવશક્તા ।
અસ્માન્ પુરસ્કૃત્ય ભવત્સકાશં પ્રાપ્તા નિજક્લેશનિવેદનાય ॥ ૧-૭૭॥

તદેતદાવેદનમસ્મદીયં શ્રુત્વા પ્રમાણં પ્રભુરિત્યુદીર્ય ।
વિધિર્વ્યરંસીદ્વિહિતપ્રણામઃ સ ચાપિ ગમ્ભીરમુવાચ દેવઃ ॥ ૧-૭૮॥

અલં વિષાદેન દિવૌકસો વઃ સમીહિતં હસ્તગતં મનુધ્વમ્ ।
વ્રતં હિ મે કેવલમેતદેવ સંરક્ષણં યચ્છરણાગતાનામ્ ॥ ૧-૭૯॥

મામર્થયન્તે વસુદેવપત્ન્યૌ પત્ની ચ નન્દસ્ય સુતં ગુણાઢ્યમ્ ।
અંશદ્વયેન વ્રતકર્શિતાઙ્ગીસ્તિસ્રોઽપિ તાઃ પુત્રવતીર્વિધાસ્યે ॥ ૧-૮૦॥

ઇયં ચ લોકત્રિતયસ્ય માતા માયાભિધાના મમ શક્તિરગ્ર્યા ।
કાર્યાણિ વઃ કાન્યપિ કર્તુકામા જનિષ્યતે જન્મવિનાશશૂન્યા ॥ ૧-૮૧॥

તદ્ગચ્છત સ્વર્ગમપેતખેદાઃ ન કાલહાનિઃ પરિશઙ્કનીયા ।
અનેન શાર્ઙ્ગેણ શપે શરૈર્વઃ સદ્યો મનઃશલ્યમપાકરિષ્યે ॥ ૧-૮૨॥

ઇતિ તમમરલોકં સાન્ત્વયિત્વા સ દેવઃ
સપદિ નવઘનાભઃ પદ્મનાભસ્તિરોઽભૂત્ ।
સ ચ વિહિતનમસ્યસ્તસ્ય વાચં પ્રશંસન્
નિજપદમભિપેદે હર્ષપર્યાકુલાત્મા ॥ ૧-૮૩॥

ઇતિ સુકુમારકૃતૌ કૃષ્ણવિલાસકાવ્યે પ્રથમસ્સર્ગઃ ॥ ૧ ॥

---

## દ્વિતીયઃ સર્ગઃ

અથૈકદા પુત્રફલાનિ સમ્યગ્વ્રતાનિ બાહ્યોપવને ચરન્તીમ્ ।
રથેન કંસો વસુદેવયુક્તઃ સ્વસારમાલોકયિતું જગામ ॥ ૨-૦૧॥

સ્ફુરત્પ્રભાપલ્લવિતાઙ્ગયષ્ટીં કથઞ્ચિદૂઢસ્તનમઞ્જરીકામ્ ।
તત્રાલકૈઃ ષટ્/પદિનીમજાનાત્ સ તાં લતામધ્યગતાં ચિરેણ ॥ ૨-૦૨॥

સા સન્નતાઙ્ગી નિયમાવસાને જ્યેષ્ઠાય તસ્મૈ વિદધે નમસ્યામ્ ।
સ ચાશિષા તામનુગૃહ્ય સાધ્વીં ભોજેશ્વરો વાક્યમિદં બભાષે ॥ ૨-૦૩॥

અદ્યાપિ બાલાસિ સુતાનનેકાન્ પ્રસોષ્યસે કિં વ્રતયાતનાભિઃ ।
પશ્યાધુના પલ્લવસૂતિકાલે કિં કલ્પતે ચૂતલતા ફલાય ॥ ૨-૦૪॥

કૃશાસિ કામં વિરમ પ્રયાસાન્મનોભિરામાનુપભુઙ્ક્ષ્વ ભોગાન્ ।
અઙ્ગાનિ તે સન્નતગાત્રિ દુઃખં મૃણાલકલ્પાનિ કથં સહેરન્ ॥ ૨-૦૫॥

તામેવમુક્ત્વા સ તુ સાભ્યનુજ્ઞાં રથં સમારોપ્ય સહૈવ પત્યા ।
પ્રયાતુકામઃ પુરમન્તરિક્ષે શુશ્રાવ વાચં શતધારકલ્પામ્ ॥ ૨-૦૬॥

ત્વદન્તિકસ્થા સહજાશમીયં પ્રસોષ્યતે પુત્રમયં કૃશાનુમ્ ।

મરુત્સમિદ્ધસ્સ તુ દુર્નિવારસ્ત્વાં ભસ્મસાત્ કંસ કરિષ્યતીતિ ॥ ૨-૦૭॥

નિશમ્ય તદ્ભૂતવચો નિકામં કંસસ્સ રોષાગમદુર્નિરીક્ષ્યઃ ।
કૃપાં પરિત્યજ્ય કૃપાણપાણિઃ સ્વસુર્વધાય સ્વયમુદ્યતોઽભૂત્ ॥ ૨-૦૮॥

નૃશંસકૃત્યે નિતરાં પ્રવૃત્તમુદગ્રકોપસ્ફુરિતાધરોષ્ઠમ્ ।
પ્રસાદયન્નાનકદુન્દુભિસ્તમુવાચ ધીમાનુપપત્તિયુક્તમ્ ॥ ૨-૦૯॥

અલં તવાનેન વધોદ્યમેન ત્વયા વિધેયો નૃપતે વિમર્શઃ ।
કિમેષ નાશ્રાવિ વિચારશૂન્યં વ્રજન્ત્યનર્થા ઇતિ સાધુવાદઃ ॥ ૨-૧૦॥

ભયેન યુદ્ધેષુ પુરન્દરાદીન્ સુરાન્ પરાચસ્ત્રપયા વિમુઞ્ચન્ ।
મહીશ્વર સ્ત્રીવધપાતકેઽસ્મિન્ કથં તવોપક્રમતે કૃપાણઃ ॥ ૨-૧૧॥

અનેન કિં વા તવ જીવિતેન યદ્રક્ષણં સ્યાત્ સહજાવધેન ।
ગુણેન કેનાપિ હિ લબ્ધનામ્નામપિ સ્વનાશાદયશો ગરીયઃ ॥ ૨-૧૨॥

પ્રપદ્યમાનસ્ય સદાભિવૃદ્ધિં દિવાનિશં પ્રીણયતશ્ચ લોકાન્ ।
ભવદ્યશશ્ચન્દ્રમસોઽસ્ય માભૂન્નવઃ કલઙ્કો ભગિનીવધેન ॥ ૨-૧૩॥

સ્વસુર્વધેનાસ્ય ભવેદકીર્તિસ્તેન ત્યજેયુસ્સુહૃદોઽપિ ભીતાઃ ।
ઇત્યેવ નૂનં ભુજનિર્જિતૈસ્તૈસ્સુરૈઃ પ્રયુક્તસ્સુમહાનુપાયઃ ॥ ૨-૧૪॥

કાલેન તદ્દ્રક્ષ્યસિ યન્મદુક્તં મા ભૂત્તવાસ્મિન્ વિષયેઽપિ શઙ્કા ।
તથાપિ ચેતસ્તવ શઙ્કતે ચેદાકર્ણ્યતાં તર્હ્યપરઃ પ્રકારઃ ॥ ૨-૧૫॥

સર્વાણ્યપત્યાનિ વશે તવાહં જાતાનિ જાતાનિ સમર્પયિષ્યે ।
તન્નિગ્રહં વા તદનુગ્રહં વા વિચિન્ત્ય કર્તાસિ દશાનુરૂપમ્ ॥ ૨-૧૬॥

કિં બુદ્ધિમાન્દ્યેન નિજેન તસ્ય કિં ભાગધેયેન વરાઙ્ગનાયાઃ ।
બલેન કિં વા ભવિતવ્યતાયાસ્તથેતિ જગ્રાહ વચસ્તદીયમ્ ॥ ૨-૧૭॥

વધપ્રવૃત્તો વસુદેવમન્ત્રપ્રભાવસંસ્તમ્ભિતઘોરકર્મા ।
નિવૃત્ય નિસ્ત્રિંશમહાભુજઙ્ગો મહીભૃતઃ કોશબિલં વિવેશ ॥ ૨-૧૮॥

સત્યા નુ સા સ્યાદશરીરિણી વાક્ સત્યં કિમેતદ્વસુદેવવાક્યમ્ ।
વિતર્કયન્નેવમુદસ્તકેતું પુરીં પ્રપેદે મણિતોરણાઢ્યામ્ ॥ ૨-૧૯॥

આલોકનૈર્મૌલિષુ ભૂપતીનામાસજ્જયન્નઞ્જલિબન્ધનાનિ ।
સ વૈમનસ્યેન મુખસ્થિતેન ભયાવહઃ સ્વં ભવનં જગામ ॥ ૨-૨૦॥

વિશઙ્કમાનઃ સ ગૃહોપકણ્ઠે તૌ સદ્મનિ ક્વાપિ વિધાય ગુપ્તૌ ।
પરાક્રમાક્રાન્તસમસ્તલોકઃ પુરેવ ભોગાનયમન્વભુઙ્ક્ત ॥ ૨-૨૧॥

માયા હરેસ્સાઽથ હિરણ્યપુત્રાન્ યાન્ દેવકીગર્ભગતાનકાર્ષીત્ ।
ભોજેશ્વરસ્સત્વરમેત્ય ભીત્યા તાન્ જાતમાત્રાનવધીત્ ક્રમેણ ॥ ૨-૨૨॥

જગદ્વિભૂત્યૈ પરમસ્ય પુંસઃ યો દેવકીગર્ભમવિક્ષદંશઃ ।
આકૃષ્ય તસ્માન્મુરવૈરિમાયા તં રોહિણીગર્ભગતં ચકાર ॥ ૨-૨૩॥

ચકાસ સપ્તચ્છદપાણ્ડુરેણ સુતેન સા ગર્ભતિરોહિતેન ।
વલાહકાન્તર્હિતશીતભાનોર્દિશો દશાં વૃત્રજિતઃ પ્રપન્ના ॥ ૨-૨૪॥

તતસ્સમાહ્લાદનમીક્ષણાનામસૂત પુત્રં શરદિન્દુકલ્પમ્ ।
પ્રકર્ષમાપન્નુદયેન યસ્ય સદ્યઃ સમુદ્રા ઇવ સત્વવન્તઃ ॥ ૨-૨૫॥

પત્યુસ્સમાદિષ્ટમિદં વિધાય શેષં ચિકીર્ષુસ્સુરકાર્યમાર્યા ।
ચરાચરાણાં જગતાં સવિત્રી સા શ્રદ્દધે જન્મભુવં યશોદામ્ ॥ ૨-૨૬॥

અથ પ્રજાનામભિવૃદ્ધિકામો દેવો દયાયાઃ કિલ જન્મભૂમિઃ ।
સ્વજન્મને જન્મવિનાશહેતુઃ પ્રાપ્યસ્સતાં પ્રાપ સ દેવકીં તામ્ ॥ ૨-૨૭॥

કૃશાવલગ્ના કુચયોર્ગરિમ્ણા સા દેવકી સન્નતગાત્રયષ્ટિઃ ।
જગત્ત્રયીપુણ્યકૃતાવલમ્બા બભાર ગર્ભેણ જગન્નિવાસમ્ ॥ ૨-૨૮॥

અન્તર્દધાના સરસીરુહાક્ષં સ્વેનાવતારેણ ભુવં પુનાના ।
સા દેવકી સા ચ કવેરકન્યા મિથોઽદધાતામુપમાનભાવમ્ ॥ ૨-૨૯॥

અલં નિવાસાય ન યસ્ય વિશ્વં વસન્ સ ગર્ભે મુમુદે મુકુન્દઃ ।
પરોપકારપ્રભવં હિ દુઃખં પુંસસ્સુખાયૈવ મહત્તરસ્ય ॥ ૨-૩૦॥

બહિઃસ્ફુરન્ત્યા કરપાઞ્ચજન્યત્વિષેવ વિષ્ણોરુદરસ્થિતસ્ય ।
અધત્ત તસ્યાસ્તપનીયવર્ણા મધૂકપુષ્પચ્છવિમઙ્ગયષ્ટિઃ ॥ ૨-૩૧॥

બભાર હારં કુચયોર્ન તન્વી ન પાદયોર્નૂપુરમામુમોચ ।
દધૌ મણિં ભારભિયા ન મૌલૌ તદેવ કૈવલ્યમભૂષયત્તામ્ ॥ ૨-૩૨॥

દૃશઃ પ્રયત્નેન દધૌ તિરશ્ચીરુવાચ મન્દં નિભૃતં જહાસ ।
શનૈર્યયૌ દત્તકરા સખીભિર્ભૃશં નિશશ્વાસ ચ તાવદેવ ॥ ૨-૩૩॥

સહૈવ હર્ષેણ સુધાશનાનાં સહૈવ પુણ્યેન વસુન્ધરાયાઃ ।
ભયેન ભોજાધિપતેશ્ચ દેવો સહૈવ ગર્ભે વવૃધે મુકુન્દઃ ॥ ૨-૩૪॥

શિરોભિરૂઢેન વનસ્પતીનાં ફલોપહારેણ નિવેદિતર્દ્ધિઃ ।
પ્રાવૃટ્ સમાસાદિતસૂતિકાલાં તાં દેવકીં દ્રષ્ટુમિવાજગામ ॥ ૨-૩૫॥

અથૈકદેશા ઇવ વારિરાશેરુચ્ચૈઃ પુરોમારુતવિપ્રકીર્ણાઃ ।
વૃતાસ્તડિદ્વિદ્રુમવલ્લરીભિર્વિરેજિરે વ્યોમનિ વારિવાહાઃ ॥ ૨-૩૬॥

બલાહકવ્રાતભવૈસ્તમોભિર્દિનેષુ દુર્બોધપુરઃસ્થિતેષુ ।
ન કશ્ચિદાસીદભિસારિકાણાં વિદ્યુત્પ્રકાશેન વિનાऽન્તરાયઃ ॥ ૨-૩૭॥

પયોદભસ્ત્રાન્તરનિર્ગતેન ઝાત્કારિણા ચણ્ડસમીરણેન ।
વિયોગિનાં ચેતસિ મેઘકાલઃ સન્ધુક્ષયામાસ મનોભવાગ્નિમ્ ॥ ૨-૩૮॥

સ્મરેણ લોકત્રિતયેશ્વરેણ સમ્ભાવિતાજ્જીવિતનિર્વિશેષમ્ ।
ઋતોર્વસન્તાજ્જ્વલદાગમસ્ય જહાર જાતિર્નિખિલં નિકર્ષમ્ ॥ ૨-૩૯॥

બલાદ્ગૃહીતા ઇવ વૈતસીભિઃ શાખાભિરારૂઢમદા ઇવોચ્ચૈઃ ।
પરિસ્ખલન્ત્યો નિખિલાસ્તટિન્યઃ જગ્મુર્જવાદુદ્ભટફેનહાસાઃ ॥ ૨-૪૦॥

ઉદારસૌરભ્યવશીકૃતાનામન્વીયમાનઃ પટલૈરલીનામ્ ।
અકલ્પયત્ કેતકમાતરિશ્વા મનોભવસ્યાપિ મનોવિકારમ્ ॥ ૨-૪૧॥

અત્યમ્બુપાનપ્રભવસ્ય કર્તુમન્તર્જડિમ્નઃ પ્રતિસંવિધાનમ્ ।
પપુસ્તિરસ્કારપદેન મેઘાઃ મયૂખમાલામરવિન્દબન્ધોઃ ॥ ૨-૪૨॥

રરાજ ખર્જૂરફલપ્રકાશં નવં પયઃ કાનનપલ્વલેષુ ।
પયોદવૃન્દૈઃ પરિપીય મુક્તં પ્રભાકરસ્યેવ મરીચિજાલમ્ ॥ ૨-૪૩॥

મહીભૃતાં મૂર્દ્ધસુ દત્તપાદં વિલોક્ય મિત્રં વિહતપ્રતાપમ્ ।
મગ્ને જલે મર્તુમિવારવિન્દે મધુવ્રતાશ્ચુક્રુશુરન્તરિક્ષે ॥ ૨-૪૪॥

નિષેવ્ય હંસા મધુરૈર્વચોભિઃ પદ્માકરં લબ્ધસમીહિતાર્થાઃ ।
સદ્યો યયુસ્તસ્ય વિપત્તિકાલે જલાશયાનાં પ્રકૃતિઃ કિલૈષા ॥ ૨-૪૫॥

પ્રરૂઢસસ્યાઃ ફલમૂલશાકૈર્નિરન્તરાઃ સ્વાદુનવોદકાઢ્યાઃ ।
પલ્લીજુષાં ચેતસિ પામરાણાં ધૃતિં પરામાદધિરે વનાન્તાઃ ॥ ૨-૪૬॥

સમુન્મિષન્તી ગિરિમલ્લિકાનાં પ્રસૂનરાજિસ્સુતરાં વિરેજે ।
મુક્ત્વા નભો મેઘવિમર્દભીત્યા નક્ષત્રમાલેવ ગતા ધરિત્રીમ્ ॥ ૨-૪૭॥

ધારાલજીમૂતકૃતાન્ધકારે તસ્મિન્નપર્યન્તજડિમ્નિ કાલે ।

અલક્ષ્યમાણઃ ક્વચિદંશુમાલી દિવાઽપ્યુવાસેવ તનૂનપાતિ ॥ ૨-૪૮॥

ઇતિ પ્રવૃત્તે સમયે ઘનાનાં માસે નભસ્યે નિશિ મધ્યમાયામ્ ।
ગણે શુભાખ્યાયિનિ ચ ગ્રહાણાં દેવક્યુવાહ પ્રસવાભિમુખ્યમ્ ॥ ૨-૪૯॥

હરત્સુ બાહ્યં ભુવનસ્ય તાપં પ્રાવૃટ્ પ્રસૂતેષુ વલાહકેષુ ।
અસૂત તસ્યાન્તરતાપશાન્ત્યૈ કૃષ્ણામ્બુવાહં કૃપયેવ દેવી ॥ ૨-૫૦॥

દિશઃ પ્રસેદુઃ સહ નિમ્નગાભિર્જહર્ષ લોકેન સહામ્બુરાશિઃ ।
જાતે મુકુન્દે મુમુચુશ્ચ સદ્યઃ ભયેન દેવાઃ સહ પુષ્પવૃષ્ટિમ્ ॥ ૨-૫૧॥

મનોભિરામેણ મધુવ્રતાનાં નાદેન શંસન્નિવ દિષ્ટવૃદ્ધિમ્ ।
ચચાર વાયુઃ સુમનોંઽશુકાનિ સમ્પ્રાપ્ય સમ્પ્રાપ્ય મહીરુહેભ્યઃ ॥ ૨-૫૨॥

વ્યજૃમ્ભત પ્રસ્ફુટશઙ્ખનાદઃ તારેણ ગીતધ્વનિના વિમિશ્રઃ ।
સમશ્નુવાનઃ કકુભાં મુખાનિ દિવૌકસાં મઙ્ગલતૂર્યઘોષઃ ॥ ૨-૫૩॥

ત્રપામપાસ્યન્ વિનયં વિલુમ્પન્ નીતિં નિગૃહ્ણન્ ભયમાશુ ભઞ્જન્ ।
શરીરિણામચ્યુતજન્મજન્મા મોદો જજૃમ્ભે મદનિર્વિશેષઃ ॥ ૨-૫૪॥

આષાઢિનં પાણિમુદસ્ય દૂરં બ્રહ્મર્ષિલોકઃ પતદુત્તરીયઃ ।
નનર્ત પર્યાકુલપાદચારઃ પ્રહસ્યમાનઃ સુરસુન્દરીભિઃ ॥ ૨-૫૫॥

શૃઙ્ગોજ્ઝિતૈઃ કુઙ્કુમવારિપૂરૈરન્યોન્યમભ્યુક્ષણતત્પરાણામ્ ।
પ્રમોદજન્મા દિવિ સમ્બભૂવ કોલાહલઃ કોઽપિ સુધાશનાનામ્ ॥ ૨-૫૬॥

પિતૄંશ્ચ પુત્રા પિતરશ્ચ પુત્રાન્ ગુરૂંશ્ચ શિષ્યા ગુરવશ્ચ શિષ્યાન્ ।
પતીંશ્ચ દારાઃ પતયશ્ચ દારાન્ પ્રમોદમત્તાસ્સિષિચુઃ પયોભિઃ ॥ ૨-૫૭॥

અસિઞ્ચદમ્ભોરુહયોનિરિન્દ્રં તં પઙ્કજાવાસમસિઞ્ચદિન્દ્રઃ ।
અસિઞ્ચતાં દ્વૌ વિબુધાનશેષાન્ સર્વે સુરાસ્તૌ ચ બલાદસિઞ્ચન્ ॥ ૨-૫૮॥

મિથઃ પયોભિઃ સિષિચુર્વિનેદુઃ વવલ્ગુરુચ્ચિક્ષિપુરમ્બરાણિ ।
અન્યોન્યમંસેન સુદૂરમૂહુર્મત્તા ઇવ સ્વર્ગસદો બભૂવુઃ ॥ ૨-૫૯॥

ત્રિલોકનાથોદયસમ્ભવેન મોદેન પર્યાકુલમાનસાનામ્ ।
ગીતે ચ નૃત્તે ચ સુરાઙ્ગનાનાં બભૂવ તાલસ્ખલિતં ન દોષઃ ॥ ૨-૬૦॥

શૃઙ્ગોદકાસ્ફાલનરક્તનેત્રાઃ વિચ્છિન્નહારાશ્ચ્યુતકર્ણભૂષાઃ ।
પ્રહાસસીદધ્વનિભિર્વચોભિઃ સમાલપન્તો વિબુધા વિજહ્રુઃ ॥ ૨-૬૧॥

જાતે હરૌ દૈત્યવિમર્દનેન વિશ્વમ્ભરાભારમપાચિકીર્ષૌ ।
મુનેઃ પ્રહર્ષઃ કલહપ્રિયસ્ય જગત્પ્રહર્ષશ્ચ સમાવભૂતામ્ ॥ ૨-૬૨॥

ઇતિ પ્રહર્ષાકુલિતૈર્મનોભિઃ વિશ‍ૃઙ્ખલં ક્રીડતિ દેહિવર્ગે ।
કંસસ્સભૃત્યઃ પ્રતિપદ્ય મૂર્છાં નિદ્રાભિધાનાં ન કિમપ્યબોધિ ॥ ૨-૬૩॥

શ્યામં ચતુર્બાહુમુદારહારં કિરીટિનં કુણ્ડલદીપ્તગણ્ડમ્ ।
પિતાઽપિ માતા ચ વિલોક્ય પુત્રમાનન્દમગ્નૌ વિવશાવભૂતામ્ ॥ ૨-૬૪॥

નિયમ્ય હર્ષોદયપારવશ્યં તં દેવકીજાનિરુવાચ વાચમ્ ।
પ્રસીદ ભીતોઽહમતીવ કંસાદિદં તુ રૂપં પ્રતિસંહરેતિ ॥ ૨-૬૫॥

તત્પ્રેરિતસ્તલ્પગતં કરાભ્યાં તમાદદે કલ્પિતબાલભાવમ્ ।
તયોશ્શયાનઃ કરયોસ્સ તસ્ય પ્રકામમપ્રીયત પદ્મનાભઃ ॥ ૨-૬૬॥

અશેત યઃ પ્રાગ્વટપત્રમધ્યે લોકાનશેષાનુદરે દધાનઃ ।
વિના તપોભિઃ કિમુ તસ્ય સિધ્યેત્તત્પાણિયુગ્મે શયનં મુરારેઃ ॥ ૨-૬૭॥

તમાલનિલેન તમોભરેણ નિપીડિતાશાવલયે નિશીથે ।
આદાય પઙ્કેરુહલોચનં તં સદ્યઃ સ નિર્ગત્ય ગૃહાત્ પ્રતસ્થે ॥ ૨-૬૮॥

નિવાર્ય વર્ષોદકમાત્મનૈવ પ્રકાશ્ય માર્ગં ફણરત્નભાસા ।
ઉપાયમુક્ત્વા વસુદેવકર્ણે શેષસ્સિષેવે બહુધૈવ વિષ્ણુમ્ ॥ ૨-૬૯॥

પુરાત્ સ નિર્ગત્ય પુમાંસમાદ્યં વહન્ વહન્તીં યમુનામપશ્યત્ ।
કૂલઙ્કષૌઘાઽપિ કલિન્દકન્યા તદીયગુલ્ફદ્વયસોદકાઽભૂત્ ॥ ૨-૭૦॥

ઉત્તીર્ય તાં તત્તટસંશ્રિતાનાં દાતું કરં વાર્ષિકમાગતાનામ્ ।
વ્રજૌકસાં નન્દપુરોગમાનાં પ્રીતો નિવેશં સહસા વિવેશ ॥ ૨-૭૧॥

પ્રવિશ્ય જાનન્નિવ નન્દગોપનિવેશનં સુપ્તશરીરિવર્ગમ્ ।
સુતાં પ્રસૂય પ્રતિપન્નનિદ્રાં દદર્શ તદ્ધર્મવધૂં યશોદામ્ ॥ ૨-૭૨॥

તં શાયયિત્વા શયને તદીયે કન્યાં સમાદાય નિપત્ય ગચ્છન્ ।
શુશ્રાવ પુત્રોદયહર્ષમૂલં કોલાહલં ગોપવધૂજનાનામ્ ॥ ૨-૭૩॥

કરેણ કન્યાં મનસા ચ પુત્રં વહન્ મુહૂર્તેન વિલઙ્ઘ્ય માર્ગમ્ ।
વિશઙ્કમાવિશ્ય ગૃહં ગૃહિણ્યાઃ નિધાય બાલાં શયને સ તસ્થૌ ॥ ૨-૭૪॥

સા ચઞ્ચરીકસ્વનસન્નિભેન નાદેન લોકસ્ય મનો હરન્તી ।
રુરોદ કિઞ્ચિદ્વિવૃતેન બાલા સ્ફુટત્પયોજાકૃતિના મુખેન ॥ ૨-૭૫॥

આકર્ણ્ય બાલધ્વનિમસ્તનિદ્રાઃ પ્રધાવ્ય રક્ષાપુરુષા જવેન ।
પ્રબોધ્ય યત્નેન પતિં પૃથિવ્યાઃ શશંસુરસ્મૈ ભગિનીં પ્રસૂતામ્ ॥ ૨-૭૬॥

સદ્યઃ સમાગત્ય સ તત્ર દૃષ્ટ્વા બાલામમર્ષેણ વિમર્શશૂન્યઃ ।
સ્વસ્રા નિષિદ્ધોઽપિ વધાભિલાષી જગ્રાહ તસ્યાશ્ચરણૌ કરાભ્યામ્ ॥ ૨-૭૭॥

ઉદસ્ય દૂરં તરસા કરેણ ચિક્ષેપ તાં દુર્મતિરશ્મપૃષ્ઠે ।
મહીમયાતૈવ દિવિ સ્થિતા સા જજ્વાલ ધામ્ના જગતાં સવિત્રી ॥ ૨-૭૮॥

તતઃ કરૈસ્તામરસપ્રકાશૈઃ સા મન્દમાન્દોલિતશસ્ત્રજાલા ।
વિલોક્ય તં વિહ્વલચિત્તવૃત્તિં જગાદ વાચં જગદેકમાતા ॥ ૨-૭૯॥

ત્વમગ્રહીર્મચ્ચરણૌ રુષાઽપિ પ્રાયઃ ફલં તસ્ય ન હન્મિ યત્ત્વામ્ ।
જાતઃ પૃથિવ્યાં તવ જાલ્મ હન્તા સદ્યો હિતં ચિન્તય સાધયામિ ॥ ૨-૮૦॥

ઇતિ નૃપમભિધાય જ્યોતિષા કુર્વતી સા તડિદિવ નયનાનિ પ્રાણિનામાકુલાનિ ।
સુરયુવતિભિરુચ્ચૈર્ગીયમાનાપદાના સુરપદમભિપેદે પાટિતાભ્રા જવેન ॥ ૨-૮૧॥

શ્રુત્વા તસ્યા શ્રવણપરુષાં વાચમન્તર્વિષણ્ણઃ
પુત્રાપાયવ્યથિતમનસં સાન્ત્વયિત્વા સ્વસારમ્ ।
પદ્ભ્યામેવ સ્વભવનમથ પ્રાપ્ય કૃચ્છ્રાદનૈષીત્
કંસશ્ચિન્તાકુલિતહૃદયો જાગ્રદેવ ત્રિયામામ્ ॥ ૨-૮૨॥

ઇતિ સુકુમારકૃતૌ કૃષ્ણવિલાસકાવ્યે દ્વિતીયાસ્સર્ગઃ ॥ ૨ ॥

## તૃતીયઃ સર્ગઃ

પ્રાતઃ પ્રલમ્બપ્રમુખાનમાત્યાન્ સર્વાન્ સમાહૂય સ ભોજરાજઃ ।
સવિભ્રમપ્રેરિતદૃષ્ટિદત્તે સ્થાને નિષણ્ણાનવદદ્વિનીતઃ ॥ ૩-૦૧॥

સન્દિહ્ય મોહાદ્વસુદેવવાક્યં મયા પ્રમાણીકૃતભૂતવાચા ।
હતા નૃશંસેન સુતા ભગિન્યાસ્તેનાવિલં મે હૃદયં યશોઽપિ ॥ ૩-૦૨॥

જાતાં પુનઃ કાઞ્ચનકાઞ્ચનાભાં સુતાં ગતાયુર્ન્નિશિ હન્તુમૈચ્છમ્ ।
ઉત્પ્લુત્ય સા વ્યોમ્નિ જવાદતિષ્ઠત્ શસ્ત્રોત્કટા દર્શિતદિવ્યરૂપા ॥ ૩-૦૩॥

નિયમ્ય સા માતુલ ઇત્યમર્ષં પ્રસેદુષી મામવદચ્ચ બાલા ।
અરિર્મહીયાનજનિષ્ટ ભૂમૌ તવોચિતં સમ્પ્રતિ ચિન્તયેતિ ॥ ૩-૦૪॥

વ્યાહૃત્ય માં દ્યાં પ્રતિ દેવનારીગણૈર્ગતાયામિતિ સેવિતાયામ્ ।
દેવ્યામહં દુશ્ચરિતં સ્વમેવ સ્મરન્ વિનિદ્રો રજનીમનૈષમ્ ॥ ૩-૦૫॥

યુદ્ધેષુ દેવા પુરુહૂતમુખ્યાઃ ભગ્ના મયા સ્થાતુમશક્નુવન્તઃ ।
અશ્વાન્ પરિત્યજ્ય વિમુચ્ય નાગાન્ મુક્ત્વા ચ શસ્ત્રાણિ દિશો દ્રવન્તિ ॥ ૩-૦૬॥

તદેષુ નૈકોઽપિ ભુવં ગતો મે શક્નોતિ કર્તું પ્રતિકૂલભાવમ્ ।
મહીયસઃ કિં ઘટતે પરાગઃ સમીરણસ્યાભિમુખં પ્રસક્તુમ્ ॥ ૩-૦૭॥

કિમન્યદાર્તાભ્યવપત્તિકામઃ સુરેષુ સન્દર્શિતપક્ષપાતઃ ।
અજાયતોર્વ્યામસુરાન્નિહન્તું સ એવ મન્યે સરસીરુહાક્ષઃ ॥ ૩-૦૮॥

સર્વે વયં દૈત્યકુલપ્રસૂતાઃ કેનાપિ જાતા ભુવિ કારણેન ।
સ તેન સન્નહ્યતિ જેતુમસ્માનુક્તોઽયમર્થઃ કિલ નારદેન ॥ ૩-૦૯॥

અતસ્તદુચ્છેદવિધૌ વિનિદ્રાઃ યતધ્વમદ્યૈવ બલાનુરૂપમ્ ।
નખાગ્રલાવ્યસ્તરુરઙ્કુરાત્મા પરશ્વધસ્યાપિ તતોઽતિભૂમિઃ ॥ ૩-૧૦॥

યસ્મિન્ ભવત્યાશ્રિતવત્સલત્વં વિપ્રેષુ યસ્યાસ્તિ વિશેષસઙ્ગઃ ।
મનોહરં યશ્ચ બિભર્તિ રૂપં વધં સ બાલોઽર્હતિ મત્સકાશાત્ ॥ ૩-૧૧॥

મખાશ્ચ તત્પ્રીતિકૃતો નિવાર્યાઃ નિવારણીયા શ્રુતિરગ્રિમાઽપિ ।
તૃણીકૃતાશેષજનપ્રભાવા સંસ્થૌતિ યા તન્મહિમાનમેવ ॥ ૩-૧૨॥

ગતે વિરામં ગરુડધ્વજેઽસ્મિન્ મખેષુ સર્વત્ર નિવારિતેષુ ।
સુરેષુ સર્વેષ્વપિ દુર્બલેષુ હસ્તે ભવિષ્યત્યમરાવતી નઃ ॥ ૩-૧૩॥

ઇત્યૂચુષસ્તસ્ય પદોપકણ્ઠં નીરાજયન્તો મકુટપ્રભાભિઃ ।
અવાદિષુર્વિક્રમદર્પિતાસ્તે કૃતાટ્ટહાસધ્વનિકમ્પિતાશાઃ ॥ ૩-૧૪॥

કિં ચિન્તયા પાર્થિવ ભુઙ્ક્ષ્વ ભોગાનસ્માસુ જીવત્સુ કુતો રિપુસ્તે ।
કથં મયૂખેષુ પરિસ્ફુરત્સુ સરોજબન્ધોસ્તમસાભિભૂતિઃ ॥ ૩-૧૫॥

અમાતરિશ્વાનમહવ્યવાહં અસૂર્યશીતાંશુમવજ્રપાણિમ્ ।
અનચ્યુતેશાનપિતામહં ચ દ્રષ્ટાસિ રાજન્નચિરેણ લોકમ્ ॥ ૩-૧૬॥

ઇત્યૂચુષસ્તાનુચિતોપહારૈઃ સમ્ભાવ્ય કૃત્યેષુ સમાદિદેશ ।
સ દેવકીમાનકદુન્દુભિં ચ વિમોચયામાસ ચ બન્ધનસ્થૌ ॥ ૩-૧૭॥

લબ્ધ્વા નિધાનં ન તથા દરિદ્રો ગતિં સમાસાદ્ય તથા ન પઙ્ગુઃ ।
તથા ન ચાન્ધો દૃશમાપ્ય હૃષ્યેદ્યથાપ્તપુત્રઃ સ જહર્ષ નન્દઃ ॥ ૩-૧૮॥

તપને ચરમાચલં પ્રપન્ને તમસા ચ સ્થગિતેષુ દિઙ્મુખેષુ ।
યમુનાતટવાસિનં તમૂચે વસુદેવઃ પ્રતિપદ્ય નન્દગોપમ્ ॥ ૩-૧૯॥

તપસા તવ નન્દગોપ મન્યે ફલિતં જન્મસહસ્રસઞ્ચિતેન ।
ઋણમન્ત્યમપોહિતું ત્વદીયં યદયં પુત્રનિધિઃ સમાવિરાસીત્ ॥ ૩-૨૦॥

ઇહ ખેલતિ પૂતનેતિ કૃત્યા શિશુહત્યાનિરતા પુરોપકણ્ઠે ।
તદહર્નિશમત્ર રક્ષણીયો નયનાનન્દકરઃ સુતસ્ત્વયાઽયમ્ ॥ ૩-૨૧॥

અથવા કિમિવાસ્યતે ત્વયાસ્મિન્નિજમુત્સૃજ્ય પદં પુરોપકણ્ઠે ।
સવિધે ન વસન્તિ બુદ્ધિમન્તો ફણિનો વાયુસખસ્ય ભૂપતેશ્ચ ॥ ૩-૨૨॥

પ્રતિવેદિ નિવિષ્ટપૂર્ણકુમ્ભં વિલસત્તોરણમુજ્જ્વલપ્રદીપમ્ ।
વ્રજ ગોકુલમાકુલં પ્રજાભીભવદીયાગમનપ્રહર્ષિણીભિઃ ॥ ૩-૨૩॥

શિશુરસ્તિ મમાપિ રૌહિણેયો ભવદીયે વિષયે વિવર્ધમાનઃ ।
સ ચ સાધુ નિરીક્ષ્ય રક્ષિતવ્યો વપુષા કેવલમાવયોર્હિ ભેદઃ ॥ ૩-૨૪॥

ઇત્યુક્ત્વા ગતવતિ દેવકીસહાયે સંત્રસ્તઃ કથમપિ નીતરાત્રિશેષઃ ।
આરોહત્યુદયમહીધરસ્ય શ‍ૃઙ્ગં તિગ્માંશૌ નિજવસતિં પ્રતિ પ્રતસ્થે ॥ ૩-૨૫॥

સચકિતમૃગમણ્ડલાનિ કુર્વન્ શકટશતધ્વનિભિર્વનાન્તરાણિ ।
પ્રમુદિતમથ ગોકુલં પ્રપેદે દિશિ દિશિ મારુતધૂતકેતુમાલમ્ ॥ ૩-૨૬॥

નિજવસતિમભિપ્રપદ્ય તુષ્ટઃ કિમપિ ન કર્મ કરોતિ નન્દગોપઃ ।
નવનલિનપલાશચારુનેત્રં વદનમહર્નિશમાત્મજસ્ય પશ્યન્ ॥ ૩-૨૭॥

મુગ્ધભાવમધુરેણ રઞ્જયન્ શૈશવેન હૃદયં વ્રજૌકસામ્ ।
ગોકુલે સ વિજહાર કેશવઃ ક્ષીરવારિનિધિમપ્યચિન્તયન્ ॥ ૩-૨૮॥

વદનં મધુસૂદનઃ કરાભ્યાં ચરણાઙ્ગુષ્ઠમુપાનયત્ પિપાસુઃ ।
ગલિતેવ તતસ્સુરસ્રવન્તી નખમુક્તામણિદીધિતિચ્છલેન ॥ ૩-૨૯॥

અમૃતાંશુરિવાપરઃ પ્રમોદં નયનાનાં જનયન્ સ પદ્મનાભઃ ।
ભવનં ભવનાત્ કરૌ કરાભ્યાં વ્રજયોષિદ્ભિરનીયતાઙ્કમઙ્કાત્ ॥ ૩-૩૦॥

અધઃ કદાચિચ્છકટસ્ય શાયિતઃ સ્વકાર્યપર્યાકુલયા યશોદયા ।
સ લીલયા પાદસરોરુહં શનૈરુદઞ્ચયામાસ સરોજલોચનઃ ॥ ૩-૩૧॥

મધુભિદશ્ચરણામ્બુજતાડિતં શકટમાશુ સમુત્થિતમમ્બરે ।

વિપરિવૃત્ય પપાત મહીતલે પટુતરધ્વનિપૂરિતદિઙ્મુખમ્ ॥ ૩-૩૨॥

શકટપતનજન્મ નન્દમુખ્યાઃ સ્તનિતમિવ ધ્વનિતં નિશમ્ય ગોપાઃ ।
કિમિદમિતિ ભયેન તત્ર જગ્મુસ્ત્વરિતગતિચ્યવમાનકેશબન્ધાઃ ॥ ૩-૩૩॥

કુચકલશવિલગ્નપાણિપદ્મા વિગલિતબન્ધમનોજ્ઞકેશપાશા ।
સપદિ સહ સખીભિરન્વધાવત્ કલમણિનૂપુરશિઞ્જિતા યશોદા ॥ ૩-૩૪॥

કૃતસ્મિતં ક્વચિદપરિક્ષતં સુતં વિલોક્ય તં પ્રમુદિતમાનસા પરમ્ ।
વ્રજૌકસાં સવિધનિવાસિનાં મુખાદ્વિસિસ્મિયે વિદિતતદીયવિક્રમા ॥ ૩-૩૫॥

સ્રુતશોણિતમેવ મન્યમાના ચરણં તસ્ય નિસર્ગપાટલં તત્ ।
ઉદમાર્જયદંશુકાઞ્ચલેન દ્રુતમાગત્ય પુનઃ પુનર્યશોદા ॥ ૩-૩૬॥

તિલકં મધુવિદ્વિષો લલાટે રજસા ગોમયજન્મના વિધાય ।
ઉરસા પરિરભ્ય નન્દગોપઃ સુચિરં તસ્ય સુમઙ્ગલાનિ દધ્યૌ ॥ ૩-૩૭॥

શકટં મધુસૂદનસ્ય દૃષ્ટ્વા ચરણોદઞ્ચનવિભ્રમેણ ભગ્નમ્ ।
અથ વારિનિધેર્વિવેશ ગર્ભં સ્વરથસ્યાપિ વિશઙ્ક્ય ભઙ્ગમર્કઃ ॥ ૩-૩૮॥

પરિતઃસ્ફુરતા નવેન સન્ધ્યામહસા પલ્લવપાટલેન લિપ્તાઃ ।
પતિતા ઇવ પાવકે વિરેજુઃ કકુભો દુસ્સહભાનુવિપ્રયોગાત્ ॥ ૩-૩૯॥

ક્ષુભિતશ્ચિરમમ્બરામ્બુરાશિઃ તપનસ્યન્દનવાહનાવગાહાત્ ।
સ્ફુરદુદ્ભટતારકાપદેશાત્ સહસાઽઽકીર્યત ફેનમણ્ડલેન ॥ ૩-૪૦॥

અહિમરુચિ રસાતલં પ્રવિષ્ટે ભયચકિતઃ સ્વવિનાશમાકલય્ય ।
તત ઇવ તરસોત્પતન્નસીમા તિમિરભરઃ પૃથિવીતલં પ્રપેદે ॥ ૩-૪૧॥

ભૂરન્તરિક્ષં ભવનાનિ રથ્યાઃ વનાનિ શૈલાસ્સરિતસ્સમુદ્રાઃ ।
ધ્વાન્તે દિશાં રુન્ધતિ ચક્રવાલં વ્યક્તં ન કેનાપિ કિમપ્યવેદિ ॥ ૩-૪૨॥

અથ પ્રયાતિ પ્રહરે યશોદા જને ચ કિઞ્ચિન્નિભૃતે સનિદ્રે ।
પુત્રં પયઃપાનગુરુપ્રમોદં પ્રસ્વાપયન્તી કલમિત્યગાયત્ ॥ ૩-૪૩॥

કુન્દત્વિષસ્તાલફલપ્રકાશાઃ તાપિઞ્છવર્ણાસ્તરુણાર્કભાસાઃ ।
પ્રભૂતદુગ્ધા નવનીતવત્યો ગાવસ્સહસ્રં તનય ત્વદીયાઃ ॥ ૩-૪૪॥

પ્રિયાલખર્જૂરસમગ્રસાનુઃ ફલાઢ્યરમ્ભાવનશોભનીયઃ ।
નનૂપભોગાય સુતાયમાસ્તે ગોવર્ધનો નામ મહીધરસ્તે ॥ ૩-૪૫॥

સરસિરુહવને ગતેઽપિ નિદ્રાં કથમિવ તે નયનામ્બુજે વિનિદ્રે ।
શ્રુતિપરિચયશાલિનો હિ કર્મ સ્વજનનિષેવિતમેવ સંશ્રયન્તે ॥ ૩-૪૬॥

તદ્ધ્વનિશ્રવણજાતકૌતુકા બાલજીવિતવિલોપવિશ્રુતા ।
આજગામ ગગનેન પૂતના યાતના તનુમતીવ દેહિનામ્ ॥ ૩-૪૭॥

સાઽવતીર્ય નભસો નિશાચરી ગૂઢમેવ નિષસાદ કુત્રચિત્ ।
સા ચ સુપ્ત ઇવ વીક્ષિતે સુતે સ્વાપમાપ સરસીરુહેક્ષણા ॥ ૩-૪૮॥

કૃષ્ણમઙ્કમધિરોપ્ય નિર્દયા દાતુમારભત પૂતના સ્તનમ્ ।
યત્પયોધરમુખે મુખાર્પણાદાયુષા શિશુજનો વિયુજ્યતે ॥ ૩-૪૯॥

પાઞ્ચજન્યમિવ પૂતનાસ્તનં પાણિપલ્લવયુગેન પીડયન્ ।
આનનેન મધુશત્રુરાન્તરાનાદદે સ તુ તતસ્સમીરણાન્ ॥ ૩-૫૦॥

વિપ્રકીર્ણકચબાલપલ્લવા ભગ્નબાહુવિટપા નિશાચરી ।
સા પપાત ભુવિ ઘોરનિઃસ્વના મારુતાહતમહીરુહોપમા ॥ ૩-૫૧॥

ઝટિતિ વ્યપનીતગાઢનિદ્રો મહતા તેન રવેણ પૂતનાયાઃ ।
પ્રતિપત્તુમિયાય તાં પ્રવૃત્તિં સહ ગોપાલગણેન નન્દગોપઃ ॥ ૩-૫૨॥

તસ્યાશ્શરીરમધિરુહ્ય વિચેતનાયાઃ
ક્રીડન્તમમ્બુરુહલોચનમીક્ષમાણાઃ ।
તસ્થુસ્સમુન્મિષિતવિસ્મયનિર્વિકારાઃ
નાસાધિરોપિતકરાઙ્ગુલયો મુહૂર્તમ્ ॥ ૩-૫૩॥

નન્દઃ પ્રમૃજ્ય નયને મુહુરશ્રુપૂર્ણે
પુત્રં કૃતાન્તમુખનિર્ગલિતં નિદધ્યૌ ।
દધ્યૌ ચ તસ્ય નિતરામભિવૃદ્ધિકામઃ
તત્ત્વં પરં સ હૃદયેન સમાહિતેન ॥ ૩-૫૪॥

શ્યામલઃ કમલપત્રલોચનો નીલકુન્તલભરઃ શુચિસ્મિતઃ ।
ધ્યાયતો મનસિ તસ્ય સન્નિધિં પુત્ર એવ વિદધે પુનઃ પુનઃ ॥ ૩-૫૫॥

ન ક્ષમં ભવતિ પુત્રવાસનાનિસ્તરં હૃદયમચ્યુતસ્મૃતૌ ।
ઇત્યશેષદુરિતાપહારિણીરગ્રજન્મભિરકારયત્ ક્રિયાઃ ॥ ૩-૫૬॥

પૂતનાચરિતભાવનાભવં દારુણં હૃદયદારણં પિતુઃ ।
શ્રીપતિઃ શમયતિ સ્મ વૈશસં ક્રીડિતૈરખિલલોકમોહનૈઃ ॥ ૩-૫૭॥

સ લોચને કિઞ્ચિદુપાન્તઘૂર્ણિતે નિધાય માતુર્વદને શુચિસ્મિતઃ ।
પયોધરં પાણિયુગાવલમ્બિતં મનશ્ચ તસ્યા મધુસૂદનઃ પપૌ ॥ ૩-૫૮॥

પાણિજાનુપરિચઙ્ક્રમશ્રમસ્વેદબિન્દુમધુરં મુખં વહન્ ।
ધૂસરેણ વપુષા જનાર્દનો ગોકુલં નિખિલમન્વરઞ્જયત્ ॥ ૩-૫૯॥

પરિભ્રમન્તં ભુવિ પાણિજાનુના ગવામધસ્તાત્પ્રવિશન્તમેકદા ।
સુતં યશોદા ગૃહકૃત્યતત્પરા બબન્ધ પાશેન બલાદુલૂખલે ॥ ૩-૬૦॥

જનો હિ યઃ કર્મ કરોતિ યાદૃશં સ સર્વથા તાદૃશમશ્નુતે ફલમ્ ।
બલિઃ પુરાઽબધ્યત યેન દાનવઃ સ લોકનાથોઽપિ તદાપ બન્ધનમ્ ॥ ૩-૬૧॥

નિખિલભુવનમુક્તિદે મુરારૌ ભગવતિ ગાઢમુલૂખલે નિબદ્ધે ।
પરિશિથિલસમાધિરાવિરાસીન્મનસિ મહામુનિમણ્ડલસ્ય હાસઃ ॥ ૩-૬૨॥

નિષીદ લોલેતિ નિબધ્ય સસ્મિતં ચકાર કાર્યાણિ ચકોરલોચના ।
અનાદરેણ ભ્રમયન્નુલૂખલં વિનિર્યયૌ વિશ્વપતિઃ સ્વમન્દિરાત્ ॥ ૩-૬૩॥

ઉપેયિવાંસૌ કકુભદ્રુમાત્મતાં મહીયસા નારદશાપતેજસા ।
અતિષ્ઠતામધ્વનિ કૈટભદ્વિષઃ કુબેરપુત્રૌ તરસૈવ રિઙ્ખતઃ ॥ ૩-૬૪॥

સ સન્નિકૃષ્ય સ્થિતયોઃ પરસ્પરં મહીરુહોર્મધ્યપથેન નિસ્સરન્ ।
ગતેન તિર્યક્ત્વમુલૂખલેન તૌ બભઞ્જ દામોદરગન્ધવારણઃ ॥ ૩-૬૫॥

પ્રપદ્ય દિવ્યં વપુરમ્બરસ્થિતૌ વિમુક્તશાપૌ ધનદાત્મજાવુભૌ ।
પ્રણમ્ય ભક્ત્યા પુરુષં પુરાતનં મુદાન્વિતૌ જગ્મતુરન્તિકં પિતુઃ ॥ ૩-૬૬॥

નન્દાદયઃ સપદિ ગોકુલવાસિનસ્તે
તદ્ભઙ્ગજન્મ સુમહદ્ધ્વનિતં નિશમ્ય ।
અભ્યેત્ય ભગ્નપતિતૌ કકુભદ્રુમૌ તૌ
તત્રાક્ષતં ચ દદૃશુસ્સરસીરુહાક્ષમ્ ॥ ૩-૬૭॥

નન્દઃ સમીક્ષ્ય દુરિતાનિ બહૂનિ સદ્ભ્યઃ
દત્વા ગવામયુતમાત્મસુતાભિવૃદ્ધ્યૈ ।
સમ્મન્ત્ર્ય બન્ધુભિરપાસ્ય પદં તદાશુ
વૃન્દાવનં પ્રતિ યયૌ શકટૈરસઙ્ખ્યૈઃ ॥ ૩-૬૮॥

ગત્વા સ ગોકુલપતિર્મનસોઽનુકૂલે
કૂલે કલિન્દદુહિતુર્નિદધે પદાનિ ।

રેમે ચ તત્ર પુરુહૂતપદાભિરામે
લીલાયિતાનિ તનયસ્ય નિરીક્ષ્યમાણઃ ॥ ૩-૬૯॥

દધિનિર્મથને નિરુધ્યમા સા નવનીતશ્રપણે ગવાં ચ દોહે ।
સુતકેલિહૃતેક્ષણા યશોદા ક્ષણકલ્પાનિ નિનાય વાસરાણિ ॥ ૩-૭૦॥

અનુયાતિ જિઘૃક્ષયેવ નન્દે તરસા રિઙ્ખણતત્પરસ્ય વિષ્ણોઃ ।
લલિતાલકવેલ્લિતાનિ રેજુર્મુખમાત્રેણ મુહુર્નિવર્તિતાનિ ॥ ૩-૭૧॥

અન્તરા વિહતિમદ્ભિરુત્થિતૈરસ્ફુટાક્ષરપદાભિરુક્તિભિઃ ।
ભઙ્ગુરૈશ્ચ પરિરમ્ભણોદ્યમૈર્ગોકુલં નિખિલમન્વરઞ્જયત્ ॥ ૩-૭૨॥

પશ્ય માતુલમિતિ પ્રદર્શિતં યામિનીષુ ગગને યશોદયા ।
આજુહાવ લલિતેન પાણિના શીતભાનુમરવિન્દલોચનઃ ॥ ૩-૭૩॥

આત્મનઃ પ્રતિકૃતિં વિલોકયન્ માતૃહસ્તમણિદર્પણોદરે ।
એહિ મિત્ર કિમિહેતિ કૌતુકાદ્વ્યાજહાર શતપત્રલોચનઃ ॥ ૩-૭૪॥

ગૌરવં કથમિયં સહેત મે મેદિનીતિ કૃપયેવ ચિન્તયન્ ।
માધવઃ પતનભીતિમુદ્વહન્ મન્દમેવ નિદધે પદાવલિમ્ ॥ ૩-૭૫॥

દેવો નિશાસુ હરિરઙ્ગતો જનન્યાઃ
શ‍ૃણ્વન્ કથા મધુમુચો મહતાઽઽદરેણ ।
મન્દં તદીયકરપલ્લવતાડિતોરુઃ
સુષ્વાપ કુડ્મલિતલોચનપુણ્ડરીકઃ ॥ ૩-૭૬॥

કૌતુકેન પિતુરગ્રતો હરેર્ધાવતસ્ખલનમીક્ષમાણયા ।
મોદનિઘ્નમનસા સલજ્જયા ન સ્થિતં ન ચલિતં યશોદયા ॥ ૩-૭૭॥

મુખડિણ્ડિમવાદિના પરીતો મધુજિત્ કૌતુકિના સુહૃદ્ગણેન ।
અધિરોપિતવારણેન્દ્રભાવો લલિતાભિર્ગતિભિર્ગૃહેષુ રેમે ॥ ૩-૭૮॥

અથાભિવૃદ્ધિં પ્રતિપદ્યમાનો દધ્યાદિષુ પ્રીતિમુવાહ શૌરિઃ ।
તત્તત્ પ્રદાનેન વશે વિધાતુમારેભિરે ગોકુલયોષિતસ્તમ્ ॥ ૩-૭૯॥

કુરુષ્વ નૃત્તં નવનીતમૂલ્યં કૃષ્ણેતિ સાભ્યર્થનમૂચિષીણામ્ ।
વ્રજાઙ્ગનાનાં સ પુરસ્સલીલમુદઞ્ચયામાસ પદારવિન્દમ્ ॥ ૩-૮૦॥

તાસાં મનઃપ્રીતિવિધાનદક્ષે તથા ક્ષણં તસ્થુષિ શાર્ઙ્ગપાણૌ ।
એકાઙ્ઘ્રિસંસ્પર્શવિયોગમાત્રાદધન્યમાત્માનમમન્યતોર્વી ॥ ૩-૮૧॥

ઉદઞ્ચિતં તસ્ય વિલોક્ય પાદં વેધા પુનર્વિક્રમશઙ્કિચેતાઃ ।
કમણ્ડલું પાણિતલેન ગૃહ્ણન્નભ્યુદ્યતોઽભૂદવનેજનાય ॥ ૩-૮૨॥

નૃત્તામૃતં ગોકુલયોષિતસ્તત્ કૃષ્ણસ્ય નેત્રાઞ્જલિભિઃ પિબન્ત્યઃ ।
પ્રીતિપ્રકર્ષસ્તિમિતૈર્મનોભિરાલેખ્યયોષિત્પ્રતિમા બભૂવુઃ ॥ ૩-૮૩॥

વિદુર્ન તદ્દર્શનપારવશ્યાદ્દાતું કરસ્થં નવનીતમેકાઃ ।
વિસ્રસ્ય ભૂમૌ પતિતં તદન્યાઃ ન મેનિરે પાણિસરોરુહેભ્યઃ ॥ ૩-૮૪॥

અજસ્રમેવં ભવનેષુ તાસાં બભ્રામ કૃષ્ણો નવનીતભિક્ષામ્ ।
પુરા કિલાન્યૈરનિવર્તનીયા નિવર્તિતા યેન હરસ્ય ભિક્ષા ॥ ૩-૮૫॥

ધિગ્યાચનાં ચૌર્યભવસ્ય ભૂયાનસ્ત્યંહસો નિર્હરણાભ્યુપાયઃ ।
મત્વેતિ નૂનં નવનીતચૌર્યે મધોર્નિહન્તા મતિમાબબન્ધ ॥ ૩-૮૬॥

નિર્વાપ્ય દીપં મુખમારુતેન હૈયઙ્ગવીનં નિશિ હર્તુમિચ્છન્ ।
કૃષ્ણઃ કટીભૂષણરત્નભાસા વિહન્યમાનો વિષસાદ ભૂયઃ ॥ ૩-૮૭॥

નિપીડયન્નગ્રપદેન પૃથ્વીમુન્નમ્ય દેહં ભૃશમૂર્ધ્વબાહુઃ ।
પયોઘટસ્પર્શનમશ્નુવાનસ્ત્રિવિક્રમોઽભૂત્ પરિહાસપાત્રમ્ ॥ ૩-૮૮॥

નિયમિતશ્વસિતો નિભૃતૈઃ પદૈર્નિશિ કથઞ્ચન ગર્ભગૃહં ગતઃ ।
સ તુ ભયાદસમાપ્તમનોરથો નિવવૃતે નવનીતહરો હરિઃ ॥ ૩-૮૯॥

હર્તું હરેર્વ્યવસિતસ્ય ઘને નિશીથે
ભૂષારવશ્રુતિભયાદ્વ્રજતોઽતિમન્દમ્ ।
અન્તર્ગૃહસ્ય નવનીતવતઃ પ્રવેશાત્
પ્રાગેવ હન્ત પથિ સા રજની વિભાતા ॥ ૩-૯૦॥

ગોપીસમાગમભિયા ચ તૃષા ચ ગુર્વ્યા
પાતું વિહાતુમપિ ગોપગૃહેષ્વજાનન્ ।
આદ્વારમાદધિઘટં ચ ગતાગતાનિ
કુર્વન્ સરોજનયનઃ શ્રમમેવ લેભે ॥ ૩-૯૧॥

ભિત્તિષુ પ્રતિશરીરદર્શનાત્ શઙ્કિતઃ સ નવનીતનિઃસ્પૃહઃ ।
કિઞ્ચિદન્યદિવ તત્ર માર્ગયન્નિર્જગામ મણિમન્દિરોદરાત્ ॥ ૩-૯૨॥

જિહીર્ષુરન્તર્ભવનેષુ ગોરસં દિનાન્યનૈષીત્તદુપાયચિન્તયા ।
સ જાગરૂકશ્ચ નિનાય યામિનીં મનોહરાભિર્હરણપ્રવૃત્તિભિઃ ॥ ૩-૯૩॥

દૃષ્ટેઽપિ તત્સવિધસઞ્ચરણે સ તત્ર
વક્તું નિમિત્તમુચિતં કૃતનિશ્ચયસ્સન્ ।
અભ્યર્ણ એવ નિદધે દધિભાજનસ્ય
લીલાચિતોપકરણાનિ નિજાનિ શૌરિઃ ॥ ૩-૯૪॥

વહન્ ગૃહીતો નવનીતમચ્યુતો ભયેન પારિપ્લવનેત્રપઙ્કજઃ ।
પદા લિખન્ ભૂમિમવાઙ્મુખસ્થિતો જહાર ચેતોઽપિ ચ ગોપયોષિતામ્ ॥ ૩-૯૫॥

શપે પિતૃભ્યામિત ઊર્ધ્વમેવં નાહં વિધાસ્યે નવનીતચૌર્યમ્ ।
વિનિઃશ્વસન્નિત્યભિધાય કૃષ્ણો જહાર માતુશ્ચ પિતુશ્ચ ચેતઃ ॥ ૩-૯૬॥

એહિ સદ્મ તનયેતિ સાદરં યાચિતોઽપિ સ મુહુર્યશોદયા ।
આનનેન નવનીતગન્ધિના નાજગામ વિહરન્નિવાચ્યુતઃ ॥ ૩-૯૭॥

હૃતં નવં મે નવનીતમાલયાત્ હૃતં ઘૃતં મે દધિ મે હૃતં નિશિ ।
ઇતિ પ્રભાતે વચનાનિ યોષિતામુવાહ શૃણ્વન્ ન મુખે સ વિક્રિયામ્ ॥ ૩-૯૮॥

પુત્રં કુલસ્ય ભુવનસ્ય ચ રક્ષિતાર-
મભ્યર્થિતોઽપિ ભગવાનરવિન્દનાભઃ ।
ત્વાં મે દદૌ વિધિવશાદ્ભુવનૈકચોર-
મિત્યાહ કોપમભિનીય સુતં યશોદા ॥ ૩-૯૯॥

સ સાન્ત્વનેન પ્રતિપાદનેન ભેદેન તીવ્રેણ ચ તર્જનેન
નિબદ્ધ્ય પૃષ્ટોઽપિ મુહુર્જનન્યા નાઙ્ગીકરોતિ સ્મ હરિઃ સ્વચૌર્યમ્ ॥ ૩-૧૦૦॥

સંરક્ષણાય જગતામવતીર્ય પૃથ્વ્યાં
ગોપાલસદ્મસુ હરત્યખિલં મુકુન્દઃ ।
ઇત્થં નિશમ્ય પરિહાસવચસ્સુરાણામ્-
અન્તર્જહાસ ભગવાનરવિન્દનાભઃ ॥ ૩-૧૦૧॥

કૃષ્ણસ્ય કેલિસમરેક્ષણકૌતુકેન
ગોપીષુ મુક્તભવનાસુ બહિઃ સ્થિતાસુ ।
મિત્રૈઃ પરાજિત ઇવ દ્રુતમેત્ય ગેહં
બદ્ધ્વા કવાટમહરન્નવનીતમન્તઃ ॥ ૩-૧૦૨॥

ત્રિભુવનમહનીયૈરભ્યુપાયૈરસઙ્ખ્યૈઃ
નિખિલમિતિ સ મુષ્ણન્ ગોકુલં નન્દસૂનુઃ ।
અરમત સવયોભિસ્તત્ર ગોપાલપુત્રૈ-

રપર ઇવ શશાઙ્કઃ પ્રાણિનાં પ્રીતિહેતુઃ ॥ ૩-૧૦૩॥

ઇતિ સુકુમારકૃતૌ કૃષ્ણવિલાસકાવ્યે તૃતીયઃ સર્ગઃ ॥ ૩ ॥

---

## ચતુર્થઃ સર્ગઃ

સ રોહિણીસૂનુનિબદ્ધરાગઃ સતાં શરણ્યસ્તમસોઽપહર્તા ।
મનોહરો બાલ ઇવૌષધીશો દિને દિને પોષમિયાય શૌરિઃ ॥ ૪-૦૧॥

ત્યક્ત્વા હરિઃ સ્તૈન્યકૃતાપવાદં તચ્છૈશવં પ્રાપ્ય દશાન્તરં સઃ ।
મન્યે તદંહઃપરિમાર્જનાય ગવાં પરિત્રાણસમુદ્યતોઽભૂત્ ॥ ૪-૦૨॥

પુત્રે તથોદ્યોગિનિ નન્દગોપો ગોપાલપુત્રાનનુનીય સર્વાન્ ।
ત્રાતુસ્ત્રયાણામપિ વિષ્ટપાનાં સંરક્ષણે તસ્ય સમાદિદેશ ॥ ૪-૦૩॥

માત્રા કૃતસ્વસ્ત્યયનઃ પ્રભાતે પિત્રા પરિષ્વજ્ય ચિરં વિસૃષ્ટઃ ।
સહૈવ રામેણ સમગ્રહર્ષઃ વિનિર્યયૌ વિશ્વપતિર્વનાય ॥ ૪-૦૪॥

સ પ્રાતરાશી વ્યતિષક્તપાણિર્યષ્ટિં વહન્નંસવિષક્તશૃઙ્ગઃ ।
વિમુચ્યતાં ગૌરિતિ સમ્ભ્રમેણ ગચ્છન્ પ્રતિદ્વારમવોચદુચ્ચૈઃ ॥ ૪-૦૫॥

નિશમ્ય તસ્ય ધ્વનિમૂર્ધ્વકર્ણાઃ વિલૂનપાશા ભૃશમુત્સુકિન્યઃ ।
વત્સાનપિ સ્વાનનવેક્ષ્ય ગાવઃ સસમ્ભ્રમં નિર્યયુરાલયેભ્યઃ ॥ ૪-૦૬॥

ગત્વા પુરસ્તાદ્વ્રજરાજગામી ગોષ્ઠં ગરિષ્ઠો ગુણમણ્ડલેન ।
આપૂરયન્મિત્રગણાગમાર્થં પિત્રોરભીષ્ટેન સહૈવ શૃઙ્ગમ્ ॥ ૪-૦૭॥

નભસ્સ્પૃશા કર્ણપથં ગતેન તેનૈવ સંજ્ઞાગવલસ્વનેન ।
આદાય તત્તત્પરિબર્હજાતં સદ્યો ગૃહેભ્યઃ સુહૃદો નિરીયુઃ ॥ ૪-૦૮॥

ગવાં ખુરન્યાસસમુદ્ભવેન વિષાણસઙ્ઘટ્ટનજન્મના ચ ।
પ્રસર્પતા દિક્ષુ મહાસ્વનેન ઘોષઃ ક્ષણં ઘોષમયો બભૂવ ॥ ૪-૦૯॥

પ્રધાવનૈરુત્પ્લુતિભિસ્સુદૂરં મિથો બલાદ્ગ્રાહવિમોચનૈશ્ચ ।
સમાગતૈસ્તત્ર સમં સુહૃદ્ભિર્બહુપ્રકારં વિજહાર શૌરિઃ ॥ ૪-૧૦॥

પરેણ હર્ષેણ પુરાણપુંસઃ સઙ્ક્રીડમાનસ્ય સમં સુહૃદ્ભિઃ ।
પવિત્રયામાસ પદામ્બુજોત્થિતા કરીષધૂલિઃ કકુભાં મુખાનિ ॥ ૪-૧૧॥

મહર્ષયસ્તત્ર મહાનુભાવાઃ ગૃહીતરૂપાન્તરદુર્નિરૂપાઃ ।

ભવાગ્નિસન્તાપહરે મમજ્જુઃ પદોત્થિતે તસ્ય પરાગપૂરે ॥ ૪-૧૨॥

પ્રહર્ષમાલોકયતાં જનાનાં ક્રીડાભિરાપાદ્ય મનોહરાભિઃ ।
ઉત્થાપયામાસ સ ચીત્કૃતેન ગોષ્ઠે હરિર્ગોસમજં શયાનમ્ ॥ ૪-૧૩॥

તસ્મિન્ ગવાં પાલનકૌતુકેન વનાય નિર્ગચ્છતિ દૈત્યશત્રૌ ।
યયુઃ પ્રિયાખ્યાનચિકીર્ષયેવ દિવાકૃતો દિગ્વલયં મયૂખાઃ ॥ ૪-૧૪॥

કૂલદ્રુમાણાં કુસુમાનિ ધૂન્વન્ કર્ષન્ પયશ્શીકરમણ્ડલાનિ ।
કૃષ્ણં કૃતાનેકવિહારખિન્નં યાન્તં સિષેવે યમુનાસમીરઃ ॥ ૪-૧૫॥

પરસ્ય પુંસઃ પદપઙ્કજાભ્યાં પ્રવેક્ષ્યતો ગોકુલપાલનાય ।
ચકાર નીહારહરૈર્મયૂખૈઃ પ્રવેશયોગ્યાનિ વનાનિ ભાનુઃ ॥ ૪-૧૬॥

પ્રેમ્ણા પરિત્યક્તુમશક્નુવન્તં બદ્ધાઞ્જલિં બન્ધુજનં નિવાર્ય ।
રામં પુરસ્કૃત્ય સમિત્રવર્ગઃ વિવેશ વિષ્ણુર્વિપિનાન્તરાણિ ॥ ૪-૧૭॥

અરણ્યભૂમીરવગાહમાનં તમાતપક્લાન્તમવેક્ષમાણઃ ।
પક્ષાતપત્રેણ પરિસ્તૃતેન વિયત્યસેવિષ્ટ વિહઙ્ગરાજઃ ॥ ૪-૧૮॥

મા ગચ્છ ગઙ્ગે યમુને ક્વ યાસિ કિં તત્ર ગોદાવરિ ધાવસીતિ ।
ન્યષેધિ તત્તદ્વ્યપદેશપૂર્વં માર્ગચ્યુતં ગોકુલમચ્યુતેન ॥ ૪-૧૯॥

પ્રરૂઢસુસ્નિગ્ધતૃણાઙ્કુરાસુ છાયાદ્રુમશ્યામલિતાન્તરાસુ ।
ગવાં કુલં તત્સુલભોદકાસુ પ્રચારયામાસ વનસ્થલીષુ ॥ ૪-૨૦॥

સાટોપમાન્દોલિતલમ્બસાસ્નાઃ ગાવશ્ચરન્ત્યો વલમાનવાલાઃ ।
ત્રુટ્યત્તૃણસ્તોમચટત્કૃતિન્યઃ ચક્રુઃ પ્રિયં ચેતસિ ચક્રપાણેઃ ॥ ૪-૨૧॥

હરિન્મણિશ્યામરુચીનિ તત્ર સ્વૈરં ચરન્તીષુ તૃણાનિ ગોષુ ।
શૌરિઃ સ્વયં ભુક્ત ઇવાપ તૃપ્તિં તૃપ્યન્ત્યુદારાઃ પરતર્પણેન ॥ ૪-૨૨॥

સર્વાસુ કણ્ડૂયનલિપ્સયોચ્ચૈરુન્નમ્ય કણ્ઠં દધતીષુ ગોષુ ।
બાલો હરિર્બાહુસહસ્રશૂન્યં જન્માત્મનો નિષ્ફલમેવ મેને ॥ ૪-૨૩॥

પરિભ્રમદ્ગોકુલમુગ્રકોપં સમુચ્ચલદ્ધૂલિરટદ્વિષાણમ્ ।
સ યુદ્ધમુક્ષ્ણાં મદનિર્ભરાણાં પ્રવિશ્ય મધ્યં શમયાઞ્ચકાર ॥ ૪-૨૪॥

શાખાકરાગ્રૈરવલમ્બ્ય પૃથ્વીં નિષેદુષઃ પુષ્પફલાવનમ્રાન્ ।
તત્ર દ્રુમાન્ સાદરમીક્ષમાણો જગામ તૃપ્તિં ન કદાઽપિ શૌરિઃ ॥ ૪-૨૫॥

અલક્ષ્યમૂલાન્યતિવિપ્રકર્ષાદ્ ઘોષાનુમેયસ્ખલિતોદકાનિ ।
ઉત્તુઙ્ગરોધસ્તરુમણ્ડલાનિ નિમ્નાનિ દૃષ્ટ્વા નિતરાં સ રેમે ॥ ૪-૨૬॥

અતુચ્છગુચ્છસ્તનભારનમ્રાઃ લતાઃ પ્રવાલાધરલોભનીયાઃ ।
સ તત્ર વીક્ષ્ય ભ્રમરાલકાઢ્યાસ્તામસ્મરત્તામરસાધિવાસામ્ ॥ ૪-૨૭॥

સમુત્સુકં સાગરકન્યકાયામાક્રષ્ટુમન્તઃકરણં મુરારેઃ ।
સર્વસ્ય વેત્તા સરસાં સ વાચં સઙ્કર્ષણસ્સાદરમિત્યુવાચ ॥ ૪-૨૮॥

અન્તસ્સમીરભ્રમણપ્રસઙ્ગાદુદીર્ણનાદેન ગુહામુખેન ।
ભૂયઃ પ્રયુઙ્ક્તે પૃથિવીધરસ્તે ગોવર્ધનઃ સ્વાગતમેષ શૌરે ॥ ૪-૨૯॥

નિશમ્ય ગોવર્ધનનિર્ઝરાણાં ધીરધ્વનિં કૃષ્ણશિખણ્ડિનોઽમી ।
મુદા ત્વદાલોકનજાતયેવ નૃત્યન્તિ ચક્રીકૃતબર્હભારાઃ ॥ ૪-૩૦॥

પાદાવિમૌ સઞ્ચરણાય નાલમત્રેતિ મત્વા મૃગયૂથમેતત્ ।
સ્વલોચનાંશુસ્તબકાપદેશાન્નીલોત્પલૈર્ભૂમિમિવાસ્તૃણાતિ ॥ ૪-૩૧॥

વિકીર્ય વિષ્વગ્વિપિનદ્રુમાણાં મધૂનિ પુષ્પસ્તબકચ્યુતાનિ ।
અર્કાંશુતપ્તામનિલો ધરિત્રીં સઞ્ચારયોગ્યાં ભવતો વિધત્તે ॥ ૪-૩૨॥

ન ભીતિરન્તર્ન દૃશોશ્ચલત્વં નાસ્થા તૃણેનોત્સુકતાઽપિ શાબે ।
રૂપેણ દામોદર મોહિતાસ્તે તિષ્ઠન્ત્યમી કાષ્ઠકૃતા ઇવૈણાઃ ॥ ૪-૩૩॥

તેનેતિ સન્દર્શિતમગ્રજેન મનોહરં તત્તદવેક્ષમાણઃ ।
ગાશ્ચારયન્ શાદ્વલિનીષુ ભૂષુ રેમે રમાયા રમણઃ પ્રકામમ્ ॥ ૪-૩૪॥

તં તત્ર દૃષ્ટ્વા મહનીયરૂપં શૌરિં શબર્યશ્ચરિતાર્થનેત્રાઃ ।
ફલોપહારૈરુપસૃત્ય વન્યૈરવાદિષુઃ પ્રશ્રયશોભિ વાક્યમ્ ॥ ૪-૩૫॥

ઇતઃ પદં નઃ શરપાતમાત્રં યાયાસ્સહાનેન સુહૃદ્ગણેન ।
અત્રાગમિષ્યન્તિ કિરાતપુત્રાઃ ગવામમૂષાં પરિપાલનાય ॥ ૪-૩૬॥

વ્યાધાહૃતૈર્વારણકુમ્ભગર્ભાત્ મુક્તાફલૈરામલકાભિરામૈઃ ।
પ્રસાધનં ત્વાં ભુવનત્રયસ્ય પ્રસાધયિષ્યન્તિ કિરાતકન્યાઃ॥ ૪-૩૭॥

કન્યાઽસ્તિ કાચિચ્છબરેશ્વરસ્ય યા નઃ કુલાનામધિદેવતેવ ।
તાં સર્વથા દાસ્યતિ તે સ રાજા મહાન્ત્યનર્ઘાણિ ચ યૌતકાનિ ॥ ૪-૩૮॥

ઇત્યૂચિષીણાં શબરાઙ્ગનાનામત્યાદરં ચેતસિ વીક્ષમાણઃ ।
કૃષ્ણઃ કૃપાનિઘ્નમનાસ્સ વાચમિત્યાહ લજ્જામૃદુના સ્વનેન ॥ ૪-૩૯॥

પિત્રોરનુજ્ઞામધિગમ્ય ભદ્રાઃ સમીહિતં વઃ સકલં વિધાસ્યે ।
મયિ સ્થિતે તિષ્ઠતિ ગોકુલં તદ્ગચ્છામિ મા ભૂત વિષાદવત્યઃ ॥ ૪-૪૦ ॥

ગતે પુલિન્દીરિતિ સાન્ત્વયિત્વા તદિષ્ટભઙ્ગવ્યથિતે મુકુન્દે ।
ફલાપચાયાદિષુ નિસ્પૃહાસ્તાઃ શનૈર્યયુઃ પક્કણમેવ ખિન્નાઃ ॥ ૪-૪૧ ॥

વિહૃત્ય ગર્ભેષુ લતાગૃહાણાં નિપીય વારીણિ ચ પલ્વલાનામ્ ।
ફલાનિ ચાસ્વાદ્ય મહીરુહાણાં વનાનિ ધન્યાનિ ચકાર શૌરિઃ ॥ ૪-૪૨ ॥

અથાધિરૂઢે ગગનસ્ય મધ્યં દિવાકરે દુઃસહભાનુજાલે ।
ઘર્માકુલં ગોકુલમીક્ષમાણઃ હલાયુધઃ પ્રાહ રથાઙ્ગપાણિમ્ ॥ ૪-૪૩ ॥

કિઞ્ચિત્પરિમ્લાનલતાપ્રવાલસ્તૃણાઙ્કુરભ્રાન્તકુરઙ્ગયૂથઃ ।
અહ્નઃ પરિત્યક્તજનપ્રચારઃ પ્રવર્તતે મધ્યમ એષ ભાગઃ ॥ ૪-૪૪ ॥

કુલાનિ વીક્ષસ્વ વિહઙ્ગમાનાં પક્ષાન્તરસ્થાપિતશાબકાનિ ।
કઠોરમેનં ગમયન્તિ કાલં નીડેષુ નિદ્રાલસલોચનાનિ ॥ ૪-૪૫ ॥

પ્રાયઃ કઠોરાતપપીડયેવ છાયાઃ પરિત્યક્તબહિર્વિહારાઃ ।
આલોકયાધ્વન્યજનેન સાર્દ્ધમધ્યાસતે મૂલમનોહકાનામ્ ॥ ૪-૪૬ ॥

કરૈરસહ્યૈરયમંશુમાલી તપન્ મહીમુગ્ર ઇવ ક્ષિતીશઃ ।
આશંસિતાપત્પ્રસરઃ પ્રજાભિર્ધત્તે દશામદ્ય વિગર્હણીયામ્ ॥ ૪-૪૭ ॥

વિહૃત્ય કાન્તારમહીષુ વેગાદ્વ્રાજન્નપઃ પુષ્કરિણીષુ પાતુમ્ ।
માર્ગે કરીન્દ્રઃ કરશીકરેણ પ્રિયામસાવુક્ષતિ તાપખિન્નામ્ ॥ ૪-૪૮ ॥

તમાનિ ભાસા તપનસ્ય હંસાઃ વિહાય વારીણિ નખંપચાનિ ।
પત્રેષુ વિન્યસ્ય પદાનિ મન્દં પદ્માકરે સમ્પ્રતિ પર્યટન્તિ ॥ ૪-૪૯ ॥

નિગૂઢમીનગ્રહણાભિસન્ધિં કૃછ્રેણ મુક્ત્વા કપટાસિકાં સ્વામ્ ।
અમી બકોટાસ્તપનાંશુતાપાત્તટીનિકુઞ્જં તરસા વિશન્તિ ॥ ૪-૫૦ ॥

તદેહિ યામસ્તરુષણ્ડમેતદ્ ઘર્માકુલં ગોકુલમાનયામઃ ।
અત્રૈવ વિશ્રમ્ય મુહૂર્તમાત્રં ભૂયોડપિ ગાવઃ પ્રચરન્ત્વરણ્યે ॥ ૪-૫૧ ॥

ઇતીરિતં તત્સમયાનુરૂપં વાક્યં સમાકર્ણ્ય હલાયુધસ્ય ।
આર્યો યથાજ્ઞાપયતીતિ કૃષ્ણસ્તં રામમુક્ત્વા તરુષણ્ડમાપ ॥ ૪-૫૨ ॥

અલબ્ધમાર્તાણ્ડકરપ્રવેશમારામકલ્પં તરુષણ્ડમેત્ય ।

આનેતુકામઃ સ ગવાં કુલં તદાસજ્જયામાસ મુખેન વેણુમ્ ॥ ૪-૫૩॥

સલીલમીષત્પરિવૃત્તપાદં સવિભ્રમોદઞ્ચિતસવ્યનેત્રમ્ ।
કૃષ્ણસ્ય વંશાર્પિતપાટલોષ્ઠં વીક્ષ્ય સ્થિતં વિસ્મયમાપ લોકઃ ॥ ૪-૫૪॥

તત્ર સ્થિતં તામરસાયતાક્ષં તાપિઞ્છવર્ણં શિખિપિઞ્છચૂડમ્ ।
તમેવ પશ્યન્નનિમેષતાયાઃ ફલં પ્રપેદે સુરસિદ્ધસઙ્ઘઃ ॥ ૪-૫૫॥

સ્થિતસ્ત્રિભઙ્ગ્યા વિવરેષુ વેણોર્વ્યાપારયન્નઙ્ગુલિપલ્લવાનિ ।
જગત્ત્રયીમોહવિધાનદક્ષમુત્થાપયામાસ સ નાદમુચ્ચૈઃ ॥ ૪-૫૬॥

અથોત્થિતાનન્દનિમીલિતાક્ષ્યઃ વિલૂનદૂર્વાઙ્કુરલાઞ્છિતાસ્યાઃ ।
ગાવસ્તદભ્યાશમુપેત્ય તસ્થુઃ નિસ્પન્દદેહા નિભૃતૈઃ શ્રવોભિઃ ॥ ૪-૫૭॥

નૈસર્ગિકં વૈરમપત્યસઙ્ગસ્તૃષ્ણા બુભુક્ષા કુસુમાયુધશ્ચ ।
તદ્વેણુનાદશ્રુતિતત્પરાણાં નાલં વિધાતું વિકૃતિં તિરશ્ચામ્ ॥ ૪-૫૮॥

તસ્મિન્ મનોહારિણિ ચક્રપાણેર્વનાન્તરે મૂર્છતિ વંશનાદે ।
વિધીયમાનં પરિહૃત્ય કર્મ સર્વેઽપિ સત્વા લિખિતા ઇવાસન્ ॥ ૪-૫૯॥

પ્રવૃત્તમાત્રૌ વનપદ્મિનીષુ દાતું ગૃહીતું ચ મૃણાલભઙ્ગમ્ ।
ચક્રાહ્વયસ્તદ્ગૃહમેધિની ચ પ્રસાર્ય ચઞ્ચૂ પરમાસિષાતામ્ ॥ ૪-૬૦॥

ઉપાવિશન્નુજ્ઝિતચાપલાનિ સ્વજાનુવિન્યસ્તકરાનનાનિ ।
નિષ્પન્દદૃષ્ટીનિ વનદ્રુમાણાં શાખાસુ શાખામૃગમણ્ડલાનિ ॥ ૪-૬૧॥

પદ્ભ્યામવષ્ટભ્ય મહીમુભાભ્યાં સદ્યસ્સમુત્તમ્ભિતપૂર્વકાયઃ ।
સિંહઃ કરીન્દ્રાક્રમણે પ્રવૃત્તસ્તસ્થૌ તથા કૃત્રિમસિંહકલ્પઃ ॥ ૪-૬૨॥

સિદ્ધાઃ કલત્રાણિ લતાગૃહેષુ સમુદ્યતાઃ પાયયિતું મધૂનિ ।
કરદ્વયોદઞ્ચિતરત્નપાત્રાઃ નિષેદુરાલેખ્યમિવ પ્રપન્નાઃ ॥ ૪-૬૩॥

તદ્વંશનાલાચ્ચ્યુતમચ્યુતસ્ય ગેયામૃતં સાધુ નિષેવ્ય વૃક્ષાઃ ।
ચિરં જરાજર્જરિતત્વચોઽપિ બાલા ઇવાસન્નવપલ્લવાઢ્યાઃ ॥ ૪-૬૪॥

નાદેન વેણોર્વિવશીકૃતાનાં વિદ્યાધરાણાં ગલિતાઃ કરેભ્યઃ ।
ગતિર્ભવાસ્માકમપીતિ નૂનં વીણા નિપેતુર્મધુવિદ્વિષોઽગ્રે ॥ ૪-૬૫॥

સ્વવેણુનાદેન સ જીવલોકમિત્થં પરાનન્દમયં વિધાય ।
પ્રભુર્વ્યરંસીદમરાશ્ચ સર્વે સુપ્તોત્થિતાનાં સ્થિતિરન્વભૂવન્ ॥ ૪-૬૬॥

પ્રત્યાગતે ચેતસિ તે વિદિત્વા પ્રભ્રશ્ય હસ્તાત્ પતિતા વિપઞ્ચીઃ ।
પુનર્ન્ન ચક્રુઃ પ્રતિપન્નલજ્જાઃ વિદ્યાધરાસ્તદ્ગ્રહણાભિલાષમ્ ॥ ૪-૬૭॥

મધુવ્રતાનાં ધ્વનિભિર્મનોજ્ઞૈર્વાચાલયન્તી વલયં દિશાનામ્ ।
પ્રસૂનવૃષ્ટિઃ સુરસિદ્ધમુક્તા પપાત મૌલૌ પરમસ્ય પુંસઃ ॥ ૪-૬૮॥

અવર્ષિ કેનાયમદૃષ્ટપૂર્વઃ પ્રસૂનરાશિસ્તવ મૂર્ધનીતિ ।
પૃષ્ટો વિહસ્યાહ વિભુસ્સહાયાન્ જ્ઞાનં ભવદ્ભોઽપિ કથં મમેતિ ॥ ૪-૬૯॥

વિષહ્યતાં યાતિ વિવસ્વદંશૌ વિશ્રાન્તમુત્થાપ્ય ગવાં સ પુઞ્જમ્ ।
ભૂયસ્તૃણાશ્યામલભૂતલેષુ પ્રારભ્ય સઞ્ચારયિતું વનેષુ ॥ ૪-૭૦॥

તતઃ પરિક્ષીણસહસ્રભાનોરશામ્યદૂષ્મા દિવસસ્ય તીવ્રઃ ।
યથા વિનાશે ધનસઞ્ચયસ્ય મહાવલેપો ધનિનો જનસ્ય ॥ ૪-૭૧॥

પ્રભાકરે પાટલભાસિ દૂરં દિશં પ્રતીચીમવગાહમાને ।
આલોક્ય રામઃ પરિણામમહ્નો દામોદરં સાદરમિત્યુવાચ ॥ ૪-૭૨॥

આવિર્ભવન્મન્દમરુત્પ્રચારા શાન્તાતપા નિર્વૃતસર્વસત્વા ।
વિરામવેલા દિવસસ્ય શૌરે પ્રવર્તતે પશ્ય મનોભિરામા ॥ ૪-૭૩॥

શિરોભિરૂઢેન્ધનશાકમૂલાઃ સ્વયૂથ્યમુચ્ચૈઃસ્વરમાહ્વયન્તઃ ।
વનેચરા વીક્ષ્ય વિરામમહ્નઃ સમારભન્તે સહસૈવ ગન્તુમ્ ॥ ૪-૭૪॥

શતં શતં વ્યોમનિ બદ્ધમાલાઃ શાત્કારવાચાલવિલોલપક્ષાઃ ।
વ્રજન્તિ લક્ષ્મીકૃતવાસવૃક્ષાઃ મનોજવાઃ પશ્ય પતત્રિણોઽમી ॥ ૪-૭૫॥

ભુવઃ પરાગે બહુશો લુઠિત્વા પ્રવિશ્ય નીડં કલવિઙ્ગયૂથમ્ ।
ધિનોત્યપત્યાનિ બુભુક્ષિતાનિ ગ્રાસેન ચઞ્ચૂપુટસઞ્ચિતેન ॥ ૪-૭૬॥

તદેહિ શૌરે તપનવ્યપાયાત્પ્રાગેવ યામઃ પદમસ્મદીયમ્ ।
ઇયં ક્ષતિઃ શ્વભ્રતટેન પશ્ચાદ્દુઃસઞ્ચરા લુબ્ધકનિર્મિતેન ॥ ૪-૭૭॥

શ્રુત્વેતિ રામસ્ય ગિરં મુરારિઃ અસ્ત્વેવમિત્યાદરપૂર્વમુક્ત્વા ।
સહ પ્રતસ્થે સ ચ મિત્રવર્ગૈઃ પ્રચણ્ડશૃઙ્ગધ્વનિપૂરિતાશૈઃ ॥ ૪-૭૮॥

સહપ્રયાણાય કૃતત્વરાણામૂધોભરાદૂરવિલમ્બિનીનામ્ ।
સ તત્ર તત્ર પ્રતિપાલ્ય તસ્થૌ પ્રીતો ગવામાગમનં મુકુન્દઃ ॥ ૪-૭૯॥

સમાવૃતો ગોપજનેન નન્દઃ ગોપાઙ્ગનાભિશ્ચ વૃતા યશોદા ।
અતિષ્ઠતામધ્વનિ લોચનાભ્યાં પુત્રાગતિપ્રેક્ષણસસ્પૃહાભ્યામ્ ॥ ૪-૮૦॥

ચકાર કર્ણેષુ તયોઃ પ્રમોદં દામોદરાપૂરિતશૃઙ્ગનાદઃ ।
દિવિ પ્રસર્પન્નથ પાંસુપૂરઃ નેત્રેષુ પીયૂષમિવાભ્યવર્ષત્ ॥ ૪-૮૧॥

તૌ ધૂસરાઙ્ગૌ રજસા કુમારૌ ગત્વા સ નન્દઃ પરિરભ્ય ગાઢમ્ ।
આત્માનમાનન્દસમુદ્રમગ્નં નાલં સમુદ્ધર્તુમભૂન્મુહૂર્તમ્ ॥ ૪-૮૨॥

ઉત્પત્ય ધાવદ્ભિરુદસ્તશસ્ત્રૈઃ ક્ષ્વેલારવક્ષોભિતદિગ્વિભાગૈઃ ।
આભીરવીરૈસ્સ વૃતઃ પ્રપેદે વ્રજં સમાકર્ણિતતૂર્યઘોષમ્ ॥ ૪-૮૩॥

ચાટૂક્તિભિઃ પાર્શ્વચરાનશેષાન્ વિસૃજ્ય ગોપાન્ સહિતસ્સ મિત્રૈઃ ।
વિવેશ કૃષ્ણો ભવનં દિનાન્તે સમુજ્વલન્મઙ્ગલદીપિકાભિઃ ॥ ૪-૮૪॥

કામં દિવા કર્ણપથં ગતેન નીતાઃ પ્રિયં વેણુરવેણ વિષ્ણોઃ ।
પ્રતિપ્રિયં ચક્રુરમુષ્ય સાયં ગાવઃ પયોદોહનનિઃસ્વનેન ॥ ૪-૮૫॥

અનુદિનમિતિ કુર્વન્ પાલનં ગોકુલસ્ય
ક્ષણમિવ દિવસાનિ ક્રીડયા યાપયન્ સઃ ।
અખિલમપિ ધરિત્રીભારમભ્યુદ્ધરિષ્યન્
અરમત સહ શૌરિસ્તત્ર સઙ્કર્ષણેન ॥ ૪-૮૬॥

ઇતિ સુકુમારકૃતૌ કૃષ્ણવિલાસકાવ્યે ચતુર્થઃ સર્ગઃ ॥ ૪ ॥

Encoded and proofread by PSA Easwaran

*shrIkRiShNavilAsakAvyam by Sukumarakavi*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*